आख्यान-रत्नम्

BEING STORIES OF CHANDRAHĀSA AND KUÇA-LAVA

BY

KAILASH NATH BHATNAGAR, M. A.

ORIENTAL COLLEGE, LAHORE

ALLAHABAD

RAM NARAIN LAL

Publisher and Bookseller

1934

1st Edition 1000] [*Price As. 12.*

Printed by Ramzan Ali Shah
at the National Press,
Allahabad.

INTRODUCTION

This book is prepared for High School Examinations. An explanation, however, is needed for the preparation of this book. So far we have only such books which contain pieces culled from different sources. The topics are so short that the interest of the readers is not maintained. But the fear of examinations makes them study the book. In this book I have given two interesting stories, abridged a little, from the 'Jaimini Aśvamedha Puráṇa.' One story is of Chandrahása, and the other of Kuça and Lava. The first story shows the power of Fate. The Minister Dhriṣṭabuddhi thrice tried to get (the Prince) Chandrahása killed in order to make the words of some Bráhmaṇas false, *viz.*, that he would one day inherit his rank. But Chandrahása was able to save his life all the three times, and was able to marry the daughter of that very evil-minded Minister. He was appointed ruler of the country by the old King, who himself retired to a forest for penance. He also gave to him in marriage his daughter Champaka-Máliní. In his last attempt on the life of Chandrahása, the Minister's own son Madana was killed. The Minister had asked Chandrahása to go for worship at night to the temple of Durgá situated outside the city. While Chandrahása was going to the temple he was met on the way by Madana, who directed him to the King's palace, and him-

self proceeded to the temple instead. Madana was killed there in the temple by the persons hired for this purpose by the cruel Minister. When Chandrahása returned from the King's palace, the Minister was surprised to see him still alive. Chandrahása told him that Madana had sent him to the King, while he himself had gone to the temple. The Minister hurriedly proceeded to the temple and there he saw the dead body of his son. In great sorrow, the Minister also gave up his life. On the next morning, a worshipper of the goddess saw all this, and reported the whole matter to Chandrahása, the King. The noble King Chandrahása immediately reached the temple, and was about to cut off his own head when the goddess Durgá appeared and asked him to ask for a boon. At his request, the goddess brought the dead father and son to life again. The Minister now gave up his evil designs.

The second story begins with the banishment of Sítá by Ráma. The sage Válmíki took pity on her, and took her to his hermitage. There Sitá gave birth to the twin sons, Kuça and Lava. Both these sons received instruction from Válmíki. When Ráma performed the Horse Sacrifice, and his horse was found roaming about in the forest, Lava caught hold of it, and tied it with a rope to a tree. After this, a fight ensued between the royal army and Lava. In this fight Lava gained the upper hand. Hearing of this defeat, Ráma sent his brothers one by one but all of them were defeat-

ed by these twin brothers. At last Ráma himself came to the scene of fight. He was surprised to see the great resemblance of the twin brothers with his own appearance. Later on, the sage Válmíki, having returned from the abode of the god Varuṇa, informed Ráma that the twins were his own sons. He requested him to accept the sinless Sítá together with her twin sons. Ráma took them to his capital. Sítá became a full partner of Ráma in the celebrations of the Horse Sacrifice.

The language of these two stories is very simple and beautiful. I hope these two stories will form a very suitable and useful reading for the students of High School Classes. Exhaustive notes have been added at the end of the book. This, it is hoped, will enhance the usefulness of the book.

ORIENTAL COLLEGE,
LAHORE,
January, 1934.

K. N. BHATNAGAR.

विषय-सूची

चन्द्रहास-कथा

प्रथमोऽध्यायः

नारद उवाच—

केरलाधिपतिः पूर्वमासीद्राजा सुधार्मिकः ।
तस्य पुत्रोऽभवन्मूलनक्षत्रे बहुभाग्यवान् ॥ १ ॥

तस्मात्कतिपयैरेव दिवसैर्वेष्टितं पुरम् ।
वैरिभिस्तस्य नृपतेरन्ते श्लेष्मादिभिर्यथा ॥ २ ॥

युद्धं कृत्वा स नृपतिर्जहौ प्राणान्सुधार्मिकः ।
परलोकगतं श्रुत्वा पतिं पत्न्यन्वगान्मुदा ॥ ३ ॥

पितृभ्यां रहितं बालं धात्री कौन्तलकं पुरम् ।
निन्ये पुरः श्रियस्तस्या भविष्यत्पतिमूर्जितम् ॥ ४ ॥

वर्षाणि त्रीणि च तथा पालितो यत्नतः शिशुः ।
धात्र्या कण्डनपेषादिकर्मभिः कौन्तले पुरे ॥ ५ ॥

ध्यायन्ती स्वनृपं धात्री संतप्यति दिने दिने ।
ततः पञ्चत्वमगमद् विहायार्भकमेककम् ॥ ६ ॥

सोऽर्भकस्त्र्याब्दिको गौरो लक्षणैरभिलक्षितः ।
वामपादे लघुं षष्ठीमङ्गुलिं बिभ्रदेव हि ॥ ७ ॥

तदा स्नेहेन बहुना काभिश्चित् प्रतिपालितः ।
स्त्रीभिः पञ्चाब्दिको जातस्ततः स्वैरं चचार सः ॥ ८ ॥

वीथ्यां तथाऽर्भकैः सार्धं रेमे भुङ्क्ते च तैः सह ।
भोजयन्ति च तं काश्चित् स्नापयन्ति पुरस्त्रियः ॥ ९ ॥

लेपयन्ति सुगन्धैश्च चन्दनैर्वरयोषितः ।
स्वपित्यपि च ताभिश्च बालस्तस्मिन् पुरेऽर्जुन ।
कञ्चुकादि प्रयच्छन्ति वरोष्णीषञ्च काश्चन ॥ १० ॥

उपानहौ पट्टसूत्ररज्जु बिभ्रच्छुचिः शुचिः ।
धृष्टबुद्धेः प्रधानस्य मन्दिरं स्वेच्छयाऽगमत् ॥ ११ ॥

विप्रैर्योगीश्वरैः शान्तैर्मुनिभिः समलंकृतम् ।
तं शिशुं मुनयः सर्वे दृष्ट्वा विस्मयमागताः ॥ १२ ॥
पश्चाच्च बुभुजुस्तेन शिशुना पाण्डुनन्दन ! ॥ १३ ॥

धृष्टबुद्धिर्विनीतः संस्तान्मुनीन् पर्यपूजयत् ।
अर्घ्यादिक्रियया सम्यग्भोजयामास पायसम् ।
विविधान्नमपूपांश्च मोदकान्वटकानपि ॥ १४ ॥

तृप्तास्ते मुनयः सर्वे स्वाचान्ताधौतपाणयः ।
धृष्टबुद्धिप्रदत्तेन चन्दनेन सुगन्धिना ॥ १५ ॥

वस्त्रालङ्करणैरन्यैस्तोषितास्तेऽब्रुवन् वचः ।
धृष्टबुद्धेऽभिनन्दामश्चिरञ्जीव सुखी भव ॥ १६ ॥

यस्त्वया वीक्षितो बालः पुरस्तात् पञ्चवार्षिकः ।
कोऽयं कस्य सुतः प्राप्तः कस्माद्देशाच्च तद्वद ॥ १७ ॥

इति पृष्टो धृष्टबुद्धिः प्रत्युवाच स्मयन्निव ।
कति बाला न सन्त्यस्मिन्ननाथाः पुटभेदने ।
राजकार्यगरीयस्त्वान्नाहं जानामि बालकम् ॥ १८ ॥

मुनय ऊचुः—

मनोहरो लक्षणलक्षिताङ्गो बालो ध्रुवं राज्यधरो विभाति ।
त्वं धृष्टबुद्धे प्रतिपालयैनं त्वत्सम्पदां पालयिताऽर्भकोऽग्रे ॥१९॥

ततो विसृष्टा मुनयः सरोषं बुद्ध्याऽमुना चिन्तयता किमीदृक् ।
यथाऽऽगतं ते मुनयोऽभिजग्मुः स राजमन्त्री भृशमन्वतप्यत् २०

किमेभिरीड्यैरुदितं वचो मां यत्संपदां तेऽधिपतिर्भविष्यन् ।
पाल्योऽर्भकोऽसौ, विपरीतकर्ता तेषां मुनीनामहमस्मि वाक्यम् २१

विचार्य मन्त्री नृपतेः शिशोर्वधं समाह्वयत् सोऽन्त्यजवृन्दमातुरः ।
रे रे पशुघ्ना वनगह्वरं महद्विनीय बालं प्रतिहन्तुमर्हथ ॥२२॥

चिह्नं शरीरस्य किमप्यवश्यमानाय्यमस्मत्परितुष्टिकारि ।
ततो भवद्भ्यो विविधा महिष्यो मया प्रदेया घटदुग्धभाजः ॥२३॥

नारद उवाच—

तस्य वाक्यं समाकर्ण्य चाण्डाला हर्षिताः शिशुम् ।
प्रतार्य जगृहुर्मत्ता निन्युस्तं वनगह्वरम् ।
भयानकैः पक्षिसङ्घैः सेवितं कण्टकैर्युतम् ॥ २४ ॥

सुधार्मिकस्य तनयं हसन्तमवधार्य तम् ।
शस्त्राणि शितधाराणि कोशेभ्यो जगृहुस्तदा ॥ २५ ॥
तदा स पार्थ ! देवेशं दध्यौ नारायणं स्वयम् ।
कृष्ण ! कृष्ण ! जगन्नाथ ! वासुदेव ! जनार्दन ! ॥२६॥
चाण्डालाः शितधारैश्च खड्गैर्घ्नन्ति जगत्पते ! ।
पाहि मां परमानन्द ! सर्वव्यापिन्नमोऽस्तु ते ॥ २७ ॥
ध्रुवश्च रक्षितो येन प्रह्लादो गजराट् तथा ।
निर्नाथनीचदीनानां त्वं नाथः परिगीयसे ॥ २८ ॥
न माता न पिता बन्धुरस्माकं न च गोत्रजाः ।
न त्राता यदि गोविन्दः को मे त्राता भविष्यति ॥ २९ ॥
पाहि व्यसनतो माऽद्य सर्वव्यापिन्नमोऽस्तु ते ।
ततो देवः स भगवांश्चाण्डालांस्तानमूमुहत् ॥ ३० ॥
मोहितास्त्वन्त्यजा वाक्यमब्रुवन्कीदृशः शिशुः ।
सुकुमारो विशालाक्षो दीर्घबाहुर्मनोहरः ॥ ३१ ॥
किं धृष्टबुद्धिना प्रोक्तं हन्तव्यो बालको वने ।
यच्चान्त्यजा वयं पूर्वं नानापापेन कर्मणा ॥ ३२ ॥
बालकस्य वधाद् घोराद् भविष्यामोऽत्र कीदृशाः ।
अथवा केन दोषेण पितृभ्यां रहितोऽभवत् ॥ ३३ ॥
इत्युदीर्य शिशोर्देहं निरीक्षंस्तेऽन्त्यजास्तदा ।
वामपादे कृशां षष्ठीमङ्गुलिं ददृशुस्तदा ॥ ३४ ॥

छित्त्वा नयामश्चिह्नार्थं धृष्टबुद्धेर्दुरात्मनः ।
इत्युक्त्वा चिच्छिदुः षष्ठीमङ्गुलिं तं विमुच्य च ॥३५॥
त्वरितास्ते पुरं जग्मुश्चिह्नमादाय हर्षिताः ।
धृष्टबुद्धिं नमस्कृत्य दर्शयामासुरङ्गुलिम् ॥ ३६ ॥
जहर्ष हृदि दुर्बुद्धिर्मयाऽकारि वचो वृथा ।
मुनीनामथ चाण्डालान् महिषीभिरतोषयत् ॥ ३७ ॥

इति चन्द्रहासोपाख्याने
चन्द्रहासप्रथममोक्षो
नाम
प्रथमोऽध्यायः

द्वितीयोऽध्यायः

नारद उवाच—

शृणु पार्थ ! महाबाहो ! स बालो गहने वने ।
स्मरणात्तव मित्रस्य चाण्डालैर्न हतस्तदा ॥ १ ॥
छिन्नषष्ठाङ्गुलिर्बालः क्षरद्रुधिरलेपवान् ।
भृशं रुरोद दुःखार्त्तो मोहयन् हरिणीगणम् ॥ २ ॥
पाहि मां देव ! देवेश ! कृष्ण ! नाथ ! कृपानिधे !
कृच्छ्रान्मोचय मां कान्त ! सर्वव्यापिन्नमोऽस्तु ते ॥ ३ ॥
तं हरिण्यः समागम्य लिलिहुश्चरणं शनैः ।
पक्षिणो दुःखिताः सर्वे छायां पक्षैः स्म कुर्वते ॥ ४ ॥
एतस्मिन्नन्तरे प्राप्तो देशाध्यक्षः कुलिन्दकः ।
तद्देशरक्षणार्थाय आगतो वनगह्वरे ॥ ५ ॥
अथो ददर्श तं बालं स्रवदश्रुलवाननम् ।
जपन्तं हरिनामानि राम कृष्ण रमापते ॥ ६ ॥
त्राहि मां करुणासिन्धो ! द्रौपदी च यथा पुरा ।
किमुपेक्षसि मां बालं वने मात्रा विवर्जितम् ॥ ७ ॥
यद्युपेक्षसि मां नाथ ! तवैव हि तदा त्रपा ।
त्वद्भक्ता नावसीदन्ति श्रुतमेतन्मया विभो ! ॥ ८ ॥
श्रुत्वा वाक्यं स नृपतिः कुलिन्दो विस्मयान्वितः ।
अवतीर्य हयात्क्षिप्रं बालं च परिसान्त्वयन् ॥ ९ ॥

उवाच वाक्यं मेधावी सोऽश्रूणि परिमार्जयन् ।
कः पिता तव का माता क्व च ते सुहृदां गणः ।
किमर्थं निर्जनेऽरण्ये स्थितः प्रब्रूहि मां शिशो ॥ १० ॥

बालक उवाच—

मम माता पिता कृष्णस्तेनाहं परिपालितः ।
तमपश्यन् महाराज ! रोदनं क्रियते मया ॥ ११ ॥
श्रुत्वैतच्चिन्तयामास स राजा वै कुलिन्दकः ।
ममापुत्रस्य जायेत पुत्रोऽसौ वैष्णवः शिशुः ॥ १२ ॥
इत्युक्त्वा तं समालिङ्ग्य वाजिपृष्ठे त्वरोपयत् ।
स्वयं चारुह्य नगरीं चन्दनाह्वां कुलिन्दकः ॥ १३ ॥
ययौ परिजनैः सार्धं हर्षोद्कात् स्फुरद्भुजः ।
गच्छन्पथ्यब्रवीत् सा मे पापर्द्धिः पुण्यदाभवत् ॥ १४ ॥
इत्थं ब्रुवन् स नगरीं सम्प्राप्तश्चन्दनावतीम् ।
प्रविवेश कुलिन्दः स्वभवनं पुत्रसंयुतः ॥ १५ ॥
मेधाविन्यै स्वराज्ञ्यै तं पुत्रं लब्धं न्यवेदयत् ।
सा हर्षिताऽब्रवीद्वाक्यमशोच्याऽस्म्यधुना त्वहम् ।
जाता मनोरथाः सर्वे पाविताऽहं न संशयः ॥ १६ ॥

नारद उवाच—

ततः कुलिन्दो मेधावी उत्सवं समचीकरत् ।
ब्राह्मणान् स्नातकान् वेदविदुषः पर्यपूजयत् ॥ १७ ॥

गणका अब्रुवन् हृष्टा हे कुलिन्द ! तवार्भकः ।
अयं बहुश्रवाः श्रीमान्विष्णुभक्तो महायशाः ॥ १८ ॥

चन्द्रः शुद्धमुखाद्रम्याद्धसतोऽस्य पतिष्यति ।
चन्द्रहासेति नाम्नाऽयं भविष्यति धरापतिः ॥ १९ ॥

ततः प्रभृति भोः पार्थ ! चन्द्रहासो दिने दिने ।
कुलिन्दस्याशया सार्धं व्यवर्धत यथा शशी ॥ २० ॥

सप्ताब्दिकश्चन्द्रहासो नानाक्षरविनिर्णयम् ।
विचार्य सम्यङ् मनसा हरिरित्यक्षरद्वयम् ।
स जजाप सदा, क्रुद्धस्तदा सोऽक्षरपाठकः ॥ २१ ॥

अहर्निशं चन्द्रहास ! हरिरित्यक्षरद्वयम् ।
उदाहरसि नान्यांस्त्वं वर्णान् पठसि चार्भक !॥ २२ ॥

चन्द्रहास उवाच—

सिद्धो वर्णसमाम्नायः समग्रो ह्युच्यते मया ।
हरिरित्यक्षरालापान्नान्यन्निःसरते मुखात् ।
मदीयात् किंकरोम्यत्र किंकरो भवतामहम् ॥ २३ ॥

ततो गुरुश्चुकोपास्मै वंशं भिन्नं करे दधत् ।
ककेति भण भोः शिष्य ! जिह्वैवं परिवर्त्तते ॥ २४ ॥

चन्द्रहासोऽब्रवीद्वाक्यं भीतवत्तं शनैः शनैः ।
न भणामि कदाचिन्मे न जिह्वा परिवर्त्तते ॥ २५ ॥

हरिनाम जपिष्यामि नान्यैः शास्त्रैः प्रयोजनम् ।
यत्र नाम हरेर्नास्ति तानि शास्त्राणि किं प्रभो ! ॥२६॥

नारद उवाच—

चन्द्रहासगुरुर्गत्वा कुलिन्दं वाक्यमब्रवीत् ।
महाभूतस्य संचारात् कस्यचित्तव पुत्रकः ।
अहर्निशं हरिरिति प्रजल्पन् परितिष्ठति ॥ २७ ॥

पाठितोऽपि मया शास्त्रं कुबुद्धिर्न पठत्यसौ ।
यद्याज्ञा मम राजेन्द्र ! तर्हि शास्मि न संशयः ॥२८॥

कुलिन्द उवाच—

दैवाल्लब्धो मया पुत्रः स कथं ताड्यतेऽधुना ।
ईदृशोऽपि पिशाचोऽयं मूर्खः पालयिता ध्रुवम् ॥ २९ ॥

तस्माद्याहि गृहं विप्र ! चन्द्रहासो यथासुखम् ।
वर्त्ततामष्टमेऽब्देऽस्य मेखलाबन्धनक्रियाम् ।
करिष्यामि ततश्चायं वेदाभ्यासं करिष्यति ॥ ३० ॥

यथाऽऽगतं गतो विप्रो हर्षितोऽभूत् कुलिन्दकः ।
गाढमालिङ्ग्य तं पुत्रं चन्द्रहासं मनोरमम् ॥ ३१ ॥

अनेनैकेन पुत्रेण पाविता विषया मम ।
विष्णुभक्तेन दक्षेण किमन्यैर्बहुभिः सुतैः ॥ ३२ ॥

सर्पिण्या बहवः पुत्रा जायन्ते भेकभक्षकाः ।
अयं हरिपदध्यानगतचित्तः सुतो मम ॥ ३३ ॥

किं मया चरितं पूर्वं तपः पञ्चाग्निसाधनम् ।
येनाहं प्राप्तवान् पुत्रं निपुणं जनवल्लभम् ॥ ३४ ॥

नारद उवाच—

अथाष्टमेऽब्दे संप्राप्ते मेखलाबन्धनक्रियाम् ।
चन्द्रहासस्य सकलां व्यदधात् स कुलिन्दकः ॥ ३५ ॥

ततो वेदाहुतीर्हुत्वा साङ्गं वेदमपाठयत् ।
पठित्वा निखिलं वेदं धनुर्वेदमथभ्यसत् ॥ ३६ ॥

इति चन्द्रहासोपाख्याने
चन्द्रहासविद्याध्ययनं
नाम
द्वितीयोऽध्यायः

तृतीयोऽध्यायः

अर्जुन उवाच—

कथयस्व कथामेतां सुधां रूपां मनोरमाम् ।
तारुण्यं विषयं प्राप्य किमाचरितवान् मुने !
चन्द्रहासो नृपवरस्तन्ममाचक्ष्व तत्त्वतः ॥ १ ॥

नारद उवाच—

अथोनषोडशाब्दोऽसौ जनकं वाक्यमब्रवीत् ।
विभो ! ददासि चेन्मह्यमाज्ञां दिग्विजयाय तान् ॥ २ ॥

याम्यहं सकलान्भूपाञ्जित्वा तव बलादरीन् ।
धनं समानयिष्यामि नरराजैः समं नृप ! ॥ ३ ॥

कुलिन्दः प्रत्युवाचेदं कथमेकः प्रयास्यसि ।
राजानः सन्ति दुर्जेयाः सैन्येन महता वृताः ॥ ४ ॥

अथवा वासुदेवं तं संस्मृत्य गच्छसे हठात् ।
अस्मत् स्वामी धृष्टबुद्धिर्मन्त्री कौन्तलपस्य सः ॥ ५ ॥

शतग्रामक एवायं देशस्तेनार्पितो मम ।
इतस्तस्यैव नृपतेर्वैरिणो बलवत्तराः ॥ ६ ॥

पीडयन्ति स्म मद्देशं ; त्वामाकर्ण्योपरेमिरे ।
इत्थं पितुर्वचः श्रुत्वा चन्द्रहासो ययौ मुदा ॥ ७ ॥

रथिभिः पञ्चभिः सार्धं देशांस्तान् वीरपूरितान् ।
तान् सर्वानजयद्धन्वी चन्द्रहासो नृपान् हसन् ॥ ८ ॥

विजित्य नृपतीन्सर्वान् गजानश्वान् सहस्रशः ।
सुवर्णरत्नमुक्ताभिः पूरिताञ्छकटान् बहून् ॥ ९ ॥

चन्द्रहासः समादाय स्वां पुरीं चन्दनावतीम् ।
आविवेश कुलिन्देन संमुखेनाभिनन्दितः ॥ १० ॥

अथाभ्यषिंचत्तं पुत्रं चन्द्रहासं स्वके पदे ।
वेदविद्भिर्द्विजैः सार्धं कुलिन्दः पंचमीदिने ॥ ११ ॥

महोत्सवं तदा चक्रुः पौराः सर्वे यथाक्रमम् ।
एकीभूय ततः पौराश्चन्द्रहासमपूजयन् ॥ १२ ॥

सुवर्णरत्नवासोभिः पौरानन्यांश्च दुर्गतान् ।
चन्द्रहासो द्विजान्सर्वान् समलङ्कृतवान् मुदा ॥ १३ ॥

मंदिराणि विचित्राणि स द्विजार्थमकारयत् ।
वापीकूपतडागादि पूर्तं विष्णवालयानि च ॥ १४ ॥

नारद उवाच—

तां चन्दनाह्वां परिपालयन्तं तं चन्द्रहासं जनकः कुलिन्दः ।
उवाच हे पुत्र ! मया प्रदेयं निष्कायुतं कुन्तलपाय राज्ञे ॥१५॥

तदर्धमस्मत्प्रभवे प्रदेयं पुनस्तदर्धं मम स्वामिपत्न्यै ।
तत्प्रेषयाशु त्वमुदारसत्त्व ! प्रीतिं यथा मन्त्रिनृपौ लभेताम् ॥१६॥

इतः षड्योजनं वत्स ! विद्यते कौन्तलं पुरम् ।
यस्मिन् कौन्तलपो राजा गालवेन पुरोधसा ॥ १७ ॥
राज्यं च कुरुते सम्यङ् मन्त्रिणा धृष्टबुद्धिना ।
चन्द्रहासः समाकर्ण्य पितुर्वाक्यं प्रहर्षितः ॥ १८ ॥
यन्मन्त्रिणे च राज्ञे च पत्न्यै यत्प्रेर्यते वसु ।
तत्सर्वं गालवायाशु दीयते तात ! सत्वरम् ॥ १९ ॥
इत्युक्त्वा वस्तुजातं तत्प्रेषयामास लीलया ।
वामीभिरुष्ट्रैः शकटैर्दुकूलानि च काञ्चनम् ॥ २० ॥
शुद्धं मलयजं चारुकर्पूरं मृगसम्भवम् ।
गजाः संप्रेषितास्तेन वाजिनश्च मनोरमाः ॥२१॥
तस्मै कुन्तलपायाऽसौ मन्त्रिणे धृष्टबुद्धये ।
चारुविज्ञप्तिसहितं पत्रं प्रेषितवान् पुनः ॥२२॥
पत्रं च तद्धनं सर्वं समादाय प्रतस्थिरे ।
सेवकाश्चन्द्रहासस्य प्रापुः कौन्तलकं पुरम् ॥२३॥
स्नात्वा संपूज्य च हरिं ते जग्मुः मन्त्रिणो गृहम् ।
दृष्ट्वा कृताभिषेकान् तानार्द्रवासोधराँस्तथा ॥२४॥
कुलिन्दोपरतिं मिथ्या धृष्टबुद्धिरतर्कयत् ।
अथाब्रवीदतिप्रह्वान् स कुलिन्दस्य सेवकान् ॥२५॥
कदा पञ्चत्वमापन्नः कुलिन्दो देशरक्षकः ।
दिनानि कति जातानि तच्चानिष्टमभून्महत् ॥ २६ ॥

सेवका ऊचुः—

अनिष्टं वैरिणां भूयान्मा कुलिन्दस्य जातुचित् ।
कुलिन्दस्य सुपुत्रेण चन्द्रहासेन धीमता ।
कृत्वा दिग्विजयं युष्मत्प्रदेयं प्रेषितं वसु ॥ २७ ॥
अमी हिरण्यकलशैः कर्पूरागुरुचन्दनैः ।
दुकूलैः शकटाः पूर्णा आयान्ति तव मन्दिरे ॥ २८ ॥
एषां सप्तगुणाः प्राप्ताः कुन्तलाधिपतेर्गृहम् ।
विस्मितो धृष्टबुद्धिस्तद्धनं जग्राह हर्षितः ॥ २९ ॥
द्वितीयस्मिन् दिने हृष्ट आमन्त्र्यनृपतिं ययौ ।
आलोकितुं धृष्टबुद्धिः पुरीं तां चन्दनावतीम् ॥ ३० ॥
द्वाभ्यां दिनाभ्यां नगरीं प्राप तां चन्दनावतीम् ।
महारण्यमिदं चादावद्याहोऽस्मिन् महापुरी ।
इति विस्मयमापन्नं मन्त्रिणं सम्मुखागतः ॥३१॥
कुलिन्दः सह पुत्रेण नमस्कृत्याऽऽनयद् गृहम् ।
पूजयामास विधिवत् सपुत्रः प्रणतः स्थितः ॥३२॥
तं मन्त्री परिपप्रच्छ पुत्रस्तेऽयं कदाभवत् ।
नाख्यातवान् पुत्रजन्म भवान्नः पुरतः कथम् ॥३३॥

कुलिन्द उवाच—

औरसो न हि पुत्रो मे स्वयं प्राप्तो मनोरमः ॥३४॥
एकदा मृगयाविष्टचित्तोऽहं वनगह्वरम् ।

प्रविष्टः कौन्तलपुराद्योजनद्वयसंमितम् ।
तत्राद्राक्षमहं बालं छिन्नषष्ठाङ्गुलिं सुतम् ॥३५॥
पञ्चाब्दमधिकं पुत्रादौरसाद्धरिसेवकम् ।
चन्द्रहासं विष्णुभक्तं जानीहि त्वं महामते ! ॥३६॥

नारद उवाच—

अन्तर्दृष्टिरभूत् पार्थ ! योगिवद्धृष्टधीः क्षणम् ।
अन्तर्विवृणुते स्मायं किंचित् सत्यं मुनेर्वचः ॥३७॥
स एवायं मया बालो ज्ञायते षोडशाब्दिकः ।
चाण्डालैर्वञ्चितश्चाहमङ्गुलीदर्शकैर्ध्रुवम् ॥ ३८ ॥
द्वौ पुत्रौ मम विद्येते युवानौ मदनामलौ ।
तौ किं करिष्यतश्चेत्स्यादयं मे सम्पदां प्रभुः ॥ ३९ ॥
अतिक्रान्तं हि यत्कार्यं पश्चाच्चिन्तयते बुधः !
तच्चास्य न भवेत्कार्यं चिन्तयानो विनश्यति ॥ ४० ॥
यद्गतं गतमेवास्तु करिष्याम्यनृतं वचः ।
मुनीनामथ निश्चित्य मनसाथाब्रवीद् गिरम् ॥ ४१ ॥
धारयन् हर्षचिह्नानि बाह्यान्तर्मलिनस्तथा ।
यथा पाखण्डजा चेष्टा मनुष्यस्य महीपते ! ॥ ४२ ॥

धृष्टबुद्धिरुवाच—

सफलं तव जन्माद्य येन प्राप्तः सुतः शुभः ।
ममापि हृदये हर्षः संजातस्तु महानहो ॥ ४३ ॥

इत्थं वचः प्राह निगूढभावं
क्षुरं प्रलिप्तं मधुनेव तीक्ष्णम् ।
यथा तृणैश्छादितगर्तमेव
यथान्नमाविष्टविषं विचित्रम् ॥ ४४ ॥

इति चन्द्रहासोपाख्याने
धृष्टबुद्धेश्चन्दनावतीं
प्रतिगमनं नाम
तृतीयोऽध्यायः

चतुर्थोऽध्यायः

नारद उवाच—

पुनर्दध्यौ धृष्टबुद्धिः कुबुद्धीनां महार्णवः ।
कथं मुनिवचोऽसत्यं कथं पञ्चत्वमेत्ययम् ॥ १ ॥
प्रत्यक्षं हन्मि चेदत्र कुलिन्दतनयं रिपुम् ।
तदा मां विविधैः शस्त्रैर्हिंस्युरेते न संशयः ॥ २ ॥
ततो भवेतां नूनं मे दुःखितौ मदनामलौ ।
स्वयमेव वधं कुर्यामुत राजभटैरहम् ॥ ३ ॥
नामुना तु प्रकारेण हन्तुं शक्यो मया रिपुः ।
शम्भुना यद्धृतं कंठे तद्दानाद्धन्मि तं रिपुम् ।
चन्द्रहासमिति ध्यात्वा हर्षितः सोऽब्रवीद्वचः ॥ ४ ॥

धृष्टबुद्धिरुवाच—

चन्द्रहास ! विचित्रं त्वं पत्रमानय लेखनीम् ।
मषीं यथा लिखित्वैकं पत्रं त्वां प्रेषये पुरम् ॥ ५ ॥

नारद उवाच—

तेनार्पितमुपादाय पत्रमेकान्तसंस्थितः ।
धृष्टधीरर्पयामास तस्मिन्वर्णान् यथाक्रमम् ॥ ६ ॥
स्वस्ति श्रीरस्तु मदन ! वक्तुं कारणमीदृशम् ॥ ७ ॥

चन्द्रहासोऽहितोऽतीव ममायं संपदां पदम् ।
ज्ञातव्यो नात्र संदेहः पुत्र ! कार्यं त्वयेदृशम् ॥ ८ ॥
मा रूपं मा वयो द्राक्षीः कुलं शीलं पराक्रमम् ।
विद्यां वित्तं विलम्बं माऽमित्रस्यास्य कुरु ध्रुवम् ॥९॥
विषमस्मै प्रदातव्यं त्वया मदन शत्रवे ।
पार्वतीशं शिवं ध्यात्वा कृतार्थाः स्याम यद्वयम् ॥१०॥
चन्द्रहासं विशालाक्षमूचिवान् मद्वचः शृणु ॥११॥

धृष्टबुद्धिरुवाच—

महत्कौन्तलके कार्यं विद्यते मदनं प्रति ॥ १२ ॥
त्वं याहि पत्रं हि मया मुद्रितं मा विमोचय ।
भूयाद् गूढं तत्र हितं पत्रे दत्ते सुताय मे ॥ १३ ॥
शीघ्रं वाजिनमारुह्य चतुर्भिः सेवकैर्वृतः ।
याहि कौन्तलकं पुत्र धर्म्यं द्रष्टासि पुत्रकम् ॥१४॥

नारद उवाच—

स तत्पत्रमुपादाय वेगमास्थाय शोभनम् ।
मन्त्रिणं तं नमस्कृत्य कुलिन्दं पितरं ततः ॥ १५ ॥
मेधावतीमगात्प्रष्टुं नमस्कर्तुं कुलिन्दवत् ।
तया नीराजितश्चाथ आशीर्भिरभिनन्दितः ॥ १६ ॥
दधिदूर्वाक्षतोन्मिश्रं तिलकं कुर्वती प्रसूः ।
अब्रवीत्सा तु पन्थानः शिवास्ते सन्तु सर्वदा ॥ १७ ॥

चन्द्रहासोऽथ जननीं नमस्कृत्य परीत्य च ।
प्रायादश्वाधिरूढस्तैः प्रेष्यैः प्रियहिते रतैः ॥ १८ ॥
प्राप्य कौन्तलकाभ्याशे रम्यं क्रीडावने सरः ।
वरटाभिः समं हंसा यत्र गार्हस्थ्यमास्थिताः ।
कमलोदयेन महता धवला ब्रह्मपत्रजाः ॥ १९ ॥

तस्यामलाम्भः सरसः समीपे वनं ददर्शाम्रतमालनीलम् ।
स चन्द्रहासोऽद्भुतमेव मेने साक्षाद्वसन्तं च वसन्तमत्र २०
फुल्लं पलाशं नवकुंकुमाभं तमेव वस्त्रं किल बिभ्रतं तम् ।
वनश्रिया संगमकज्जलांकं तत्पत्रवल्लीधरमद्भुताभम् २१
तत्र पल्लविता आसन् द्रुमास्तस्मिन्मधौ सति ।
मञ्जर्यः पल्लवा रम्या भान्ति चूततरौ तदा ॥ २२ ॥
तस्मिन्पल्लविते़ऽत्यन्तं कोकिलामधुरस्वरम् ।
चुकूज कामिनां चित्तमाकर्षन्तीव दूतिका ॥ २३ ॥
पुन्नागबकुलाशोकचम्पकाः पुष्पिता बभुः ।
मालतीयूथिकाजात्यः पुष्पस्तनभरानताः ॥ २४ ॥
केतक्यः पुष्पगंधाढ्या लीनभ्रमरलोचनाः ।
पुष्पपत्रैरर्चयन्त्यः स्वभर्त्तारं च माधवम् ॥ २५ ॥

नारद उवाच—

मधोरुत्सवमालोक्य कुलिन्दतनयो मुदम् ।
परां प्राप हरेरेव चरित्रं हृदये दधत् ॥ २६ ॥

स्नात्वा संपूज्य च हरिं तैः पुष्पैर्मधुसंभवैः ।
संकल्पयित्वा हरये पाथेयं बुभुजे शनैः ॥ २७ ॥
सेवकैः क्षिप्तदूर्वादिं पुरस्ताद्व्याजिनं तरौ ।
रसाले सन्नियम्याथ अशेत प्रहरद्वयम् ॥ २८ ॥
अथ कौन्तलपस्यैका कन्या चम्पकमालिनी ।
धृष्टबुद्धेश्च विषया रतिं हसति या श्रिया ॥ २९ ॥
कन्यके जग्मतुः कन्याशतेन परिवारिते ।
वसन्तागमपुष्पाढ्यं पुरोपवनमुत्तमम् ॥ ३० ॥
पुष्पावचयमिच्छन्त्यः कर्तुं सर्वाश्च कन्यकाः ।
सार्द्धत्रयोदशाब्दास्ता यौवनोद्भेदचंचलाः ॥ ३१ ॥
रम्यमौक्तिकहारैश्च मण्डिताभ्यां शनैर्ययुः ।
नृत्यन्त्यो नूपुररवैस्तालिकाशब्दकैः पथि ॥ ३२ ॥
गायन्त्यःस्म हसन्त्यःस्म क्षरत्ताम्बूलचन्द्रिकाः ।
प्रापुः क्रीडावनं रम्यं कोकिलालापनादितम् ॥ ३३ ॥
परस्परं हसन्त्यस्ताः प्रकुर्वन् पुष्पसंचयम् ।
मालतीयूथिकाजातीमोगरादिकवीरुधाम् ॥ ३४ ॥
कन्याः सुमनसां मालाश्चक्रुः कण्ठेषु ता दधुः ।
सपुष्पां दाडिमीं वीक्ष्य प्राह चम्पकमालिनी ॥ ३५ ॥

राजकन्योवाच—

विषये ! सुभगे ! पश्य महदद्भुतमग्रतः ।
आदौ पुष्पोद्गमः पश्चाद्दृश्यते स्म फलोद्गमः ॥ ३६ ॥

विपरीतं त्वयि कथं जातं बिल्वफलस्तनि ।
वनस्पतीनां धर्मोऽयं विषया प्राह भूरजाम् ॥ ३७ ॥

राजकन्योवाच—

चक्षुः स्फुरति ते वामं काको रौत्याम्रमास्थितः ।
शंसतीव प्रियं प्राप्तं कामानां तव पूरकम् ॥ ३८ ॥

इत्थं चम्पकमालिन्या वचः श्रुत्वा जहास सा ।
उवाच वचनं रम्यं लज्जतीव प्रधानजा ॥ ३९ ॥

विषयोवाच—

अलं पुष्पचयेनाद्य संतप्ता रविणा वयम् ।
यामः शीतजलं तस्मात्तत्सरः कमलाकरम् ॥ ४० ॥

तच्छ्रुत्वा वचनं तस्याः कन्यका निर्ययुर्वनात् ।
गच्छन्त्यस्तत्सरः प्रापुः पद्मिनीखण्डमण्डितम् ।
हंसा भीताः पलायन्ते सिञ्जितश्रवणाद्धनात् ॥ ४१ ॥

नारद उवाच—

ताश्चम्पकाङ्ग्यो विविशुस्तत्सरः शिवलीलया ।
अगाधं निर्मलं गाधं कलुषं तत्सरोऽभवत् ॥ ४२ ॥

कन्याभिर्निष्ककण्ठीभिस्तादृशीभिरधिष्ठितम् ।
परस्परं हासमुक्तीश्चक्रुस्ता अभितः सरः ॥ ४३ ॥

क्रीडालोलकरा स्फालत्त्रुटन्मौक्तिकपूरितम् ।
मणिबन्धस्खलद्रम्यप्रवालमणिचित्रितम् ॥ ४४ ॥

अनन्तश्रीधरं तासां मुखचन्द्रैरलङ्कृतम् ।
तत्सरः शुशुभेऽतीव रत्नाकरनिभं स्फुटम् ॥ ४५ ॥
परस्परं ताः सिषिचुर्जलेनातिसुगन्धिना ।
स्तनकुङ्कुमकस्तूरीचन्दनागुरुगन्धिना ॥ ४६ ॥
उच्छलज्जलबिन्दूनां मिषेण जलदेवताः ।
क्रीडन्ते मौक्तिकैश्चैताः कन्यकाः शुशुभुर्वने ॥ ४७ ॥
बिन्दुवर्षं समालोक्य चातका घनशङ्कया ।
मुखं व्यादाय पश्यन्ति घनपङ्क्तीः पिपासया ॥ ४८ ॥
रम्यैः कनकनालैस्तु बबन्धुः काश्च कांचन ।
जहसुर्बभ्रमुः कन्या डिण्डिमं चुक्रुशुर्जगुः ॥ ४९ ॥
एवं स्म ताः सरसि कुंकुमनीरभाजि
स्नात्वाऽबलाः परिदधुः स्म दुकूलवृन्दम् ।
ताटंकपत्रवरमौक्तिकहारनिष्कैः
पूर्णोडुपाभतिलकैर्व्यधुरंगभूषाम् ॥ ५० ॥
तां विहाय जलकेलिमुत्तमां धृष्टबुद्धितनया तटस्थिता ।
अन्ववैक्षत हरिं यथा रमा चन्द्रहासमथ सा सरस्तटे ॥ ५१ ॥
षोडशाब्दवयसं सुकुमारं श्मश्रुलं विमलदीर्घललाटम् ।
पट्टबद्धहयमल्पजनं तं सिंहशावमिव बाढममंस्त ॥ ५२ ॥

इति चन्द्रहासोपाख्याने
विषयौत्सुक्यं
नाम
चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

जैमिनिरुवाच—

जलक्रीडारुणाक्ष्यस्ता निर्ययुः स्वान्गृहान्प्रति ।
विषया न ययौ पार्थ ! चन्द्रहासगुणैर्वृता ॥ १ ॥
गच्छत्सु मानुषेष्वेको निधिं पश्यत्पुरस्थितम् ।
स यथा निश्चलस्तत्र तथा सा विषया स्थिता ॥ २ ॥
किं न याम्यथवा यामि सुन्दरं पुरुषं वने ।
अमुं विवेकं मदनस्तदीयं व्यलुनाच्छरैः ॥ ३ ॥
सैरन्ध्रीं सा समाहूय नूपुरौ प्रददौ निजौ ।
ततः पदं पदे कृत्वा दुकूलेऽपि विशंकिता ॥ ४ ॥
हंसीव सा यथा हंसं ययौ दृष्टस्तुरङ्गमः ।
चरन्दूर्वाङ्कुराञ्छयामाञ्छयामया स नमस्कृतः ॥ ५ ॥
मम प्राणान् प्रिये सक्तान् मा शब्देन वियोजय ।
इति ब्रुवन्ती शनकैः प्राप्ता कुण्डलिनं जनम् ॥ ६ ॥
पतिवक्त्रं हि विषया दत्तदृष्टिरवैक्षत ।
ततो ददर्श रुचिरं पत्रं कञ्चुकनिःसृतम् ॥ ७ ॥
गृहीत्वा तत्करेणाशु मुद्रामुन्मुच्य विस्मिता ।
वाचयामास तत्पत्रं पितुरत्यन्तहर्षिता ॥ ८ ॥
स्वस्ति श्रीरस्तु मदन वक्तुं कारणमीदृशम् ।
चन्द्रहासोऽहितोऽतीव ममायं संपदां प्रभुः ॥ ९ ॥

ज्ञातव्यो नात्र सन्देहः पुत्र ! कार्यं त्वयेदृशम् ।
मा रूपं मा वयो द्राक्षीः कुलं शीलं पराक्रमम् ॥ १० ॥
विद्यां बलं विलम्बं मामित्रस्यास्य कुरु ध्रुवम् ।
विषमस्मै प्रदातव्यं त्वया मदन ! शत्रवे ॥ ११ ॥
पार्वतीशमिति ध्यात्वा कृतार्थाः स्याम यद्वयम् ।
दध्यौ सा विषया पश्चादभिप्रायं. विवृण्वती ॥ १२ ॥
संपदां मे प्रभुर्नित्यं हितो मदनसन्निभः ।
एवमादि यथा पत्रे रुचिरं वीक्ष्यते यथा ॥ १३ ॥
वरं मनोरमं वीक्ष्य मद्रूपं हर्षनिर्भरः ।
विषमस्मै प्रदातव्यमत्र चस्खाल मे पिता ॥ १४ ॥
पितुर्वै पत्रमालोक्य मदनोऽपि हनिष्यति ॥ १५ ॥
कनिष्ठिका नखेनाथ तीक्ष्णेनादाय सुन्दरी ।
रसालद्रुमनिर्यासं लिलेख विषया तदा ॥ १६ ॥
विषयाऽस्मै प्रदातव्येत्येवं वर्णान् समालिखत् ॥ १७ ॥
पत्रं रसालनिर्यासकृतमुद्रं विधाय सा ।
कंचुकाभ्यन्तरे न्यस्य विषयाऽगान्निवेशनम् ॥ १८ ॥
पुनः पुनश्च पश्यन्ती पृष्ठतः प्राणवल्लभम् ।
ततो दृष्टा व्रजन्ती सा सखीभिर्विषया तदा ॥ १९ ॥

सख्य ऊचुः—

कस्माद्विलम्बितं भद्रे कस्माद्धर्षो महांस्त्वयि ।
कस्माद्वै वीक्ष्यते पृष्ठे कच्चिद्दृष्टो नृकेसरी ॥ २० ॥

सिंहो दृष्टः कथं त्यक्तः सुप्तो नूनं त्वयेक्षितः ।
मन्ये तदीयं सर्वस्वं मुष्णासि त्वं निगूहसे ॥ २१ ॥
क्रीडन्त्यो हास्य वचनैः सर्वाः स्वं स्वं गृहं ययुः ।
अथापि विषया कन्या प्रास्थिताऽतीव हर्षिता ॥ २२ ॥
सूर्यं दृग्भ्यां प्रपश्यन्ती प्रार्थयन्ती पतिं प्रियम् ।
विषया गृहमागत्य हृष्टा सा प्रियदर्शनात् ॥ २३ ॥
सप्तभूमिकमास्थाय मन्दिरं सा व्यलोकयत् ।
चन्द्रहासोऽपि सायाह्ने प्रबुद्धः सिंहविक्रमः ॥ २४ ॥
प्रक्षालितास्यः कृतवक्त्रशुद्धिः पल्याणयुक्तं हयमारुरोह ।
चतुर्भिरेवानुगतः स्वभृत्यैः पुरं विवेशाप्रतिमप्रभावः ॥ २५ ॥
चन्द्रहासो धृष्टबुद्धिभवनं प्राप सत्वरः ।
अवतीर्य हयात्तस्माद् द्वाःस्थं वचनमब्रवीत् ॥२६॥
अन्तः कथय रे द्वाःस्थ ! मदनं प्रति मे वचः ।
श्रीमद् धृष्टमतेर्वाक्यकारकश्चन्द्रहासकः ॥ २७ ॥
प्राप्तो वचनसन्देशकथापत्रधरो बहिः ।
शिर आनम्य स द्वाःस्थः स्वामिनं मदनं ययौ ॥२८॥
द्वाःस्थं विवेकनामानं मदनस्य प्रियं सदा ।
श्रद्धायष्टिधरं प्राप्तञ्चन्द्रहासं न्यवेदयत् ॥ २९ ॥
चामरैर्वीज्यमानं च मदनं धृष्टबुद्धिजम् ।
विवेकनामा द्वाःस्थस्तं नमस्कृत्यालपद् गिरम् ॥३०॥

विवेक उवाच—

केवलं तव भृत्योऽहं प्रियश्च न पितुस्तव ।
पितुस्तेऽन्यः क्रोधनामा हिंसायष्टिधरः प्रियः ॥ ३१ ॥

स स्वामिभक्तो मदन यावन्नायाति ते सदः ।
तावन्मदीयं वचनं शृणु सभ्यैः समन्वितः ॥ ३२ ॥
यश्चिन्त्यते सदा शान्तैर्योगिभिर्मधुसूदनः ।
तस्य भक्तश्चन्द्रहासः प्राप्तो द्वारं महामते ! ॥ ३३ ॥
उत्तस्थौ च समाकर्ण्य मदनस्तैः सभाजनैः ।
स्खलद्दुकूलाभरणः प्राञ्जलं च समुत्क्षिपत् ॥ ३४ ॥
क्षणाद्ददर्श मदनश्चन्द्रहासं हरेः प्रियम् ।
नमस्कृत्याभिलिङ्ग्याथ सभां रम्यां समानयत् ॥ ३५ ॥
वरासने सन्निवेश्य संपूज्य मदनोऽब्रवीत् ।

मदन उवाच—

कच्चित्कुलिन्दः कुशली कच्चित्कुशलिनी प्रिया ॥ ३६ ॥
कच्चित्ते विषये विप्रा वेदाभ्यासं प्रकुर्वते ।
कच्चित्क्षत्रियविट्शूद्राः पूजयन्ति द्विजान् धनैः ॥ ३७ ॥
कच्चित्प्रजा नो पिशुनैर्बाध्यन्ते दुःखदैः करैः ।
अपि त्वं कुशली प्राप्तश्चिन्तयन्मनसा हरिम् ॥
किमत्रागमने कार्यं तदाचक्ष्व जनप्रियम् ॥ ३८ ॥

चन्द्रहास उवाच—

युष्मादृशां सतां संगाद्विपदो यान्ति संक्षयम् ।
सन्देशात्ते पितुः प्राप्तः पत्रं गृह्णीष्व वाचय ॥ ३९ ॥
एकान्ते गूढमस्त्यत्र महत्कार्यं न वेद्मि तत् ।
करे गृहीत्वा मदनः पत्रं प्रोवाच विस्मितः ॥ ४० ॥
शृण्वतां सर्वलोकानां वाचयामास मन्त्रिजः ।
स्वस्त्यस्तु मदनायाशु विषयाऽस्मै प्रदीयताम् ॥ ४१ ॥
न रूपं न कुलं शौर्यं मा विद्यां चावलोकय ।
इति पत्रे स्थितं वीक्ष्य हृषितो मदनोऽब्रवीत् ॥ ४२ ॥
अद्य मे पावितो वंशः पित्रा सर्वे च बान्धवाः ।
मया यच्चिन्त्यते नित्यं स्वयमेवाभवच्च तत् ॥ ४३ ॥

नारद उवाच—

हर्म्यस्य सप्तमे पृष्ठे विषया काममोहिता ।
सखीभिः सवयोभिस्तं चन्द्रहासमवैक्षत ॥ ४४ ॥
ध्यायन्ती मनसा देवीं पार्वतीं शंकरप्रियाम् ।
भर्तारं देहि मे देवि ! दाक्षायणि ! नमोऽस्तु ते ॥४५॥

इति चन्द्रहासोपाख्याने
चन्द्रहासमदनसम्भाषणं
नाम
पञ्चमोऽध्यायः

षष्ठोऽध्यायः

अर्जुन उवाच—

अतः परं किमभवन्मदनो धृष्टबुद्धिजः ।
कथं विवाहमकरोद् विषयाचन्द्रहासयोः ॥ १ ॥
कथञ्च चन्दनावत्याः प्राप्तो मन्त्री स्वकं पुरम् ।
किमब्रवीत्स मदनं तन्ममाचक्ष्व नारद ! ॥ २ ॥

नारद उवाच—

अथ विप्रान्समाहूय ज्योतिःशास्त्रविशारदान् ।
पप्रच्छ मदनो लग्नं विषयाचन्द्रहासयोः ॥ ३ ॥
गणकास्त्वब्रुवन् वाक्यं मदनं प्रतिहर्षिताः ।
अद्यैव रुचिरं लग्नं सर्वदोषविवर्जितम् ॥ ४ ॥
गोधूलिकं वराहाद्यैरुदितं फलदं नृणाम् ।
तेषामाकर्ण्य वचनं मदनो हर्षनिर्भरः ॥ ५ ॥
आदिदेश पुरन्ध्रीस्ताः पातिव्रत्योपशोभिताः ।
स्नापयन्त्वत्र विषयां चन्द्रहासं पृथक् पृथक् ॥ ६ ॥
सजलैः कलशैरार्द्रपल्लवैस्तंतुभिर्युतैः ।
परिधाप्य च वासांसि समानयितुमर्हथ ॥ ७ ॥
रक्तचन्दनवर्णाढ्यो मदनस्तमुपाययौ ।
उत्तिष्ठोत्तिष्ठ भद्रं ते चन्द्रहास ! महामते !

पतिव्रताकरधृतैः कलशैः स्नाहि वारुणैः ॥ ८ ॥

नारद उवाच—

सुस्नातं चन्द्रहासं तं गृहे रम्ये न्यवेशयत् ॥ ९ ॥
मदनः साधुशब्दादिमधुपर्कमचीकरत् ।
जायया तारकाख्या च पादप्रक्षालनं कृतम् ॥ १० ॥

तं चन्द्रहासं रमणीयवेशमन्तर्गृहे सोऽप्यनयत्स्मराह्वः ।
स्वां कन्यकां तां विषयामथान्तरा चित्रां पटीं मन्त्रयुतैरधारयत्
पप्रच्छ गोत्रं मदनस्तदीयं पितुः पितुस्तत्पितुराशु नाम ।
स चन्द्रहासोऽप्यवदत् स्वगोत्रं हरिः स्वयं मे जनकः स एव १२
पितामहः स प्रपितामहश्च हरेर्न चान्योऽस्ति सुहृद्द्वितीयः ।
ऋते कुलिन्दाच्च गुरोर्मदीयादाधारशक्तेर्न च तस्य पत्न्याः १३
तच्चन्द्रहासीयमनन्यभावं वचो निशम्यार्थपतिः स्वकामात् ।
स्वसारमुच्चैरदाद् गिराऽस्मै लक्ष्मीपतिस्तृप्तिमुपैतु दानात् ॥१४॥
बद्धाञ्जली कुङ्कुमचर्चिताङ्गौ तौ दम्पती प्रापतुराशु वेदिम् ।
हुताशनं तर्पितमाज्यपूरैः परीयतुः सप्तपदान्ययाताम् ॥ १५ ॥
द्विजान्नमश्चक्रतुराशिषस्ताः स्वीचक्रतुः कान्तिमवापतुस्तौ ।
पतिव्रतानां तिलकानि भाले संदध्रतुः पत्रफलानि पाणौ ॥१६॥

ततोऽसौ मदनो हृष्टः प्रददौ मण्डनं बहु ।
गावश्च घटदोहिन्यो महिष्यः क्षीरसिन्धवः ॥ १७ ॥

मुक्ताफलानि रत्नानि स्वच्छानि विविधानि च ।
वासांस्यगुरुकर्पूरचन्दनानि च वीर्यवान् ॥ १८ ॥
दत्त्वा तु मदनो दध्यौ किमस्मै दीयते मया ।
चन्द्रहासाय चात्मानमर्पयामीति मे मतिः ॥ १९ ॥
मिषतां सर्वलोकानां मदनो वाक्यमब्रवीत् ।
इदं शिरः सरोजं च काले चास्मै गमिष्यति ॥ २० ॥
यदा कदाचिद्दास्यामि क्रीडनार्थं कराम्बुजे ।
यथायं चन्द्रहासो मे जामाता विषयान्वितः ।
पुत्रपौत्रैः परिवृतश्चिरकालं प्रशास्त्विमाम् ॥ २१ ॥
नानालङ्करणैर्वस्त्रैः पूजयित्वाऽथ गालवम् ।
मदनः प्रत्युवाचाथ द्विजानन्यांश्च याचकान् ॥ २२ ॥
प्रातः सर्वैरलंकार्यं गृहं पूज्यतमैर्मम ।
यथाशक्त्या किंकरोऽहं पूजयिष्यामि चाखिलान् ॥२३॥
तान् विसृज्य द्विजान् सर्वांश्चन्द्रहासमभोजयत् ।
विषयासहितं कामो बुभुजे स्वजनान्वितः ॥२४॥
सुष्वाप मदनः किंचिद् ब्राह्मे जाते समुत्थितः ।
कृत्वात्मचिन्तनं पश्चादादिदेश वचोहरान् ॥२५॥
मण्डपं रचयन्त्वेके चित्रयन्त्वथ मन्दिरम् ।
संमार्जयन्तु केचिच्च चन्दनोदकसेचनैः ।
उच्चैः क्रियन्तां विपुलाः पताका दण्डमण्डिताः ॥२६॥

नारद उवाच—

तैस्तदाकारि बीभत्सो ! सेवकैरथ निर्मला: ।
दिशः कुर्वन् समुदितो विनतातनयो विपात् ॥२७॥
कथयन्निव लोकानां स्वामिनं समुपागतम् ।
उत्थीयन्तां तु भो लोका: क्रियतां वैदिको विधिः ॥२८॥
उदयाचलकूटस्थो रविः सन्निहितोऽभवत् ।
रात्रिजं प्राणिनां चित्तमोहध्वांतमपोथयत् ॥२९॥
विषयाचन्द्रहासौ तौ स्नापितौ विमलैर्जलैः ।
हरिद्राचम्पकस्नेहैरुद्वर्त्य च पुरन्ध्रिभिः ॥३०॥
परिधाप्य च वसांसि मुकुटाभ्यामलङ्कृतौ ।
तौ दम्पती ततो वेदीमागतौ स्त्रीपुरस्कृतौ ।
कृतस्वस्त्ययनौ विप्रैरुपविष्टौ वरासने ॥३१॥
अथ प्राप्ता द्विजाः पूज्या वेदशास्त्रविशारदाः ।
नराश्वगजदेहानां सम्यग्रक्षाचिकित्सकाः ॥३२॥
मागधा नर्त्तका गीतशिक्षका वंशधारिणः ।
मृदंगवादका वेश्याः शैलूषा जलचित्रकाः ॥३३॥
ऊर्ध्वं वंशं समारुह्य ये क्रीडन्ति नराः क्षितौ ।
मुखाद्वह्नेर्महाज्वालामुत्सृजन्ति तथा च ये ॥३४॥
ढक्काडमरुजीवाश्च किन्नरा मधुरस्वराः ।
सूता ये च पुराणस्थानुच्चरन्ति नृपान् सदा ॥३५॥

प्रेतलोकगताञ्छूरान् वर्णयन्ति च मागधाः ।
वर्तमानान् नृपान् सम्यग्ये तु संग्रामकारिणः ॥३६॥
वर्णयन्ति प्रबन्धैर्ये बन्दिनस्ते समाययुः ।
नानाबन्धेषु कुशला मल्लास्ते ब्रह्मचारिणाः ॥३७॥
एवं नानाविधैर्लोकैः संकीर्णं तस्य मन्दिरम् ।
मदनस्याभवत् पार्थ ! तृष्णैका न समागता ॥३८॥
अन्ये सर्वजनाः प्राप्ता लाभकौतुकवीक्षया ।
तेभ्यो रत्नानि वासांसि काञ्चनं प्रददौ बहु ॥३९॥
अनुक्रमात् स मदनो विनयाढ्यैर्वचोमृतैः ।
सुहृत्सम्बन्धिनः सर्वांस्तोषयामास भारत ! ॥४०॥
अकैतवं हृषीकेशं ध्यायन्ति मनसा सदा ।
तेषां विघ्नगणाः पार्थ ! किं करिष्यन्ति निर्बलाः ॥४१॥
विषमस्मै प्रदातव्यमिति हेतोश्च मन्त्रिणा ।
प्रेरितश्चन्द्रहासोऽयं विषयां प्राप कन्यकाम् ॥४२॥

इति चन्द्रहासोपाख्याने
चन्द्रहासविवाहो
नाम
षष्ठोऽध्यायः

सप्तमोऽध्यायः

नारद उवाच—

तस्यां तु चन्दनावत्यां कुलिन्दं निगडैर्दृढैः ।
धृष्टबुद्धिर्बबन्धासौ दण्डयामास ताः प्रजाः ॥ १ ॥
कण्ठे बद्ध्वा शिलां तोये निमज्यार्थमयाचत ।
उपरिष्टात् कृशानोस्ताः प्रजा दध्रेऽर्थलिप्सया ॥ २ ॥
अतूतुदत् स मांसानि शस्त्रैश्च पुरवासिनाम् ।
अपाययच्चूर्णतोयं नासारन्ध्रेण कांश्चन ॥ ३ ॥
दण्डयित्वा प्रजाश्चैवं धृष्टबुद्धिरथाऽब्रवीत् ।
कुलिन्द ! त्वं हि रे मूढ ! मां न जानासि दारुणम् ॥ ४ ॥
चन्द्रहासाश्रयेण त्वं गर्वितोऽसि धनाऽऽगमात् ।
द्रव्यं तत्प्रेषितं मह्यं तेन सार्धं भवान् कथम् ॥ ५ ॥
नागतोऽसि विमूढात्मन् ! सेवकाः प्रेषितास्त्वया ।
मदीयं नाशितं द्रव्यं मन्दिरेषु त्वया व्ययात् ॥ ६ ॥
इत्थं निर्भर्त्सयामास कुलिन्दं धृष्टधीस्तदा ।
लोभमाहूय सचिवं सेवकं वाक्यमब्रवीत् ॥ ७ ॥
तृष्णया जायया सार्धं त्राहीमां चन्दनावतीम् ।
इति संदिश्य तं पश्चाद्ययौ कौन्तलकं पुरम् ॥ ८ ॥
हर्षेण महता युक्त आदाय विपुलं धनम् ।
पुत्रं मनसि संचिन्त्य चन्द्रहासं तथैव च ॥ ९ ॥

मदीयो मदनः पुत्रो विषं तस्मै प्रदास्यति ।
तृतीयो दिवसो ह्यद्य चन्द्रहासे गते सति ॥ १० ॥
एकेनाऽऽवाप नगरं द्वितीये वासरे रिपुम् ।
प्राप्तो नूनं स मदनः सायाह्ने तत्करिष्यति ॥ ११ ॥
यामेनैकेन यास्यामि कृतकार्यः पुरं प्रति ।
इति संचिन्त्य मनसा शिबिकामारुरोह सः ॥ १२ ॥
ऊढां च त्रिशतैः पुम्भिर्मत्स्यभुग्भिर्महाबलैः ।
पार्थ ! गच्छन् धृष्टबुद्धिः पापात्मा दण्डमाददे ॥ १३ ॥
वैणवं ग्रन्थिलं दीर्घं ताडयामास धीवरान् ।
शीघ्रं गच्छत रे दुष्टा धीवरा मत्स्यभक्षकाः ! ॥ १४ ॥
तेऽब्रुवन्नृप ! गच्छामो मन्त्रिञ्छीघ्रतरं प्रभो ! ।
मा ताडय भृशं दण्डप्रहारैर्गच्छतो हि नः ॥ १५ ॥
नहुषस्य कुले जातो भवान् किं न मुनीश्वराः ।
वयं स्म भूप ! मन्युत्वाद्द्रोगिराजं न कुर्महे ॥ १६ ॥
सुवाते पोतवज्जग्मुर्धीवरा ढीवराश्च ते ।
उपर्युपरि डीयन्ते काकाः स्म शिबिकां हठात् ॥ १७ ॥
चञ्च्वाभिघातं कुर्वन्ति पक्षतुण्डनखैश्च तम् ।
एवं पार्थाभवत्तत्र विद्धि पापस्य चेष्टितम् ॥ १८ ॥
तावत् पुरः प्रादुरभूद् विशालः
फणाभिराकाशमिवालिहन् वै ।

पुच्छं निवेश्य क्षितिपृष्ठ एव
प्रोवाच सर्पो नृगिरा विषाढ्यः ॥ १९ ॥

त्वदीयसौवर्णघटेषु नित्यं
वसामि रक्षंस्तव सूनुना तत् ।
स्थानं मदीयं किल नाशितं हि
गच्छामि ते स्वस्ति अलं विषादात् ॥ २० ॥

इत्येवमुक्त्वा वचनं सर्पः पातालमाविशत् ।
विसिस्माय स मूढात्मा नाजानाद् गूढपाद्वचः ॥ २१ ॥

धृष्टबुद्धिः पुनर्दण्डप्रहारैर्धीवरान् दृढम् ।
उत्तिष्ठंश्चर्वयन्नोष्ठौ दन्तैर्दन्तांश्च पीडयन् ॥ २२ ॥

युष्माकं चरणान् ग्रामं गत्वा छेत्स्यामि मा चिरम् ।
इत्थं स पीडयन् प्राप्तो धीवरान् कौन्तलं पुरम् ॥ २३ ॥

यामेनैकेन शुश्राव धृष्टधीस्तूर्यनिःस्वनम् ।
चिन्तयामास मनसा कार्यं पुत्रेण तत्कृतम् ॥ २४ ॥

नारद उवाच—

तस्माद् विमानादवरुह्य मूढः
पदातिरेकः प्रययौ पुरस्तात् ।
ददर्श सूतानथ मागधान् बहून्
स्वलङ्कृतान् वन्दिन एव वस्त्रैः ॥ २५ ॥

बन्दिन ऊचुः—

आगच्छ शीघ्रं धृष्टबुद्धे !
सुतेन कृतं कार्यं सूरिणा तत्तु सर्वम् ।
ब्रह्मायुस्ते चन्द्रहासस्य भूयात्
तथा सूनोर्मदनस्यातिदातुः ॥ २६ ॥

धृष्टबुद्धिरुवाच—

आः पापा ! रे वन्दिनश्चन्द्रहासः
कोऽसौ दूरात्सर्पत हन्मि दण्डैः ।
इत्यूचिवान् धृष्टबुद्धिः पुरस्तात्
पूज्यान् विप्रान् पूजितांश्चन्दनेन ॥ २७ ॥
नानाक्षौमैर्भूषितान् भूषणैश्च
गृहान् स्वीयानागतानन्वपश्यत् ॥ २८ ॥

विप्रा ऊचुः—

भूयादेवं स्वस्ति ते धृष्टबुद्धे !
कुतो लब्धश्चन्द्रहासो वरोऽयम् ।
भाग्योदयस्तव रम्यो विभाति
येनेदृशी कीर्तिरापूर्यते ते ॥ २९ ॥
निशम्य तेषां वचनं दुरात्मा
जज्वाल मन्त्री किल वाडवोऽब्धौ ।
दण्डं समुद्यम्य कुतः पुरस्ताद्
गमिष्यथेत्यादि जजल्प विप्रान् ॥ ३० ॥

विप्राः पलायन्ति विसृज्य वासः
कृष्णाजिनं ते तु ततः स्खलन्तः ।
विमुक्तकेशाः स्खलदुत्तरीय-
यज्ञोपवीताः पथि निःश्वसन्तः ॥ ३१ ॥
ततो हृष्टा गायका मन्त्रिणं ते
प्रोचू राज्यं चन्द्रहासो विधत्ताम् ।
स तांश्चक्रे भिन्नकपालवीणा-
मृदङ्गढक्काऽऽनकभेरिवंशान् ॥ ३२ ॥
पश्यंश्चित्रं द्वारि वर्णैर्विचित्रं
प्रायाद् द्वाराभ्यन्तरं धृष्टबुद्धिः ।
नीराजितुं चम्पकाङ्ग्योऽभिजग्मु-
र्दीपान्विताः कुङ्कुमचर्चिताश्च ॥ ३३ ॥
आह स्म ता धृष्टधीरुत्सवोऽयं
कस्मात्कृतः किं च लब्धं सुतेन ।
ऊचुर्मृगाक्ष्यस्तव सूनुनाद्य
लब्धो हितश्चन्द्रहासः कुलस्य ॥ ३४ ॥
दुष्टो मूढो धृष्टधीराह तस्मै
धनं दत्तं चन्द्रहासाय केन ॥ ३५ ॥

स्त्रिय ऊचुः—
मैवं ब्रूहि चन्द्रहासाय तस्मै
दत्ता कन्या विषया पुत्रकेण ।

तासां वचःशल्यविभिन्नगात्रो
बिभ्रच्छोणे लोचने क्रोधयुक्तः ॥ ३६ ॥
ततः प्रायात् सप्तमद्वारमध्यं
यत्रास्तेऽयं द्वारपालो विवेकः ।
श्रद्धायष्टिस्तं च दृष्ट्वा ससार
प्राप्ते क्रोधे का विवेकस्य वार्त्ता ॥ ३७ ॥
अथापश्यद् धृष्टधीर्वेदिकायां
तं चन्द्रहासं विषयां च कन्याम् ।
बद्धाञ्जलीं चन्द्रहासाञ्चलेन
पुष्पोद्गुम्फं मुकुटं बिभ्रतीं च ॥ ३८ ॥
स्वेदो महान्वेपथुश्चास्य गात्रे
प्रादुर्बभूवाप्रतिमः शुष्कमास्यम् ।
क्रुद्धो दध्यौ किं कृतं मत्सुतेन
यन्नापश्यद् गूढपत्रं मदीयम् ॥ ३९ ॥
जामाताऽथो श्वशुरं वीक्ष्य पत्न्या
सहोत्थितः कुरुते स्म प्रणामम् ।
यथा व्याघ्रं बालमृगो विलोक्य
तथा चामुं नाभ्यनन्दद् गिरापि ॥ ४० ॥
अथ मदनमुपागतं प्रगम्रं
चरणयुगे वदति स्म धृष्टबुद्धिः ।

वद सुत ! किमकारि रे दुरात्मन् !
मम च मनो न हि तोषमाजगाम ॥ ४१ ॥
आह स्म तं मदनस्तात ! पत्रं
विलोक्याहं दत्तवान् स्वां स्वसारम् ।
वरायास्मै चन्द्रहासाय धेनू-
र्वासो हिरण्यं महिषीः कोटिशोऽद्य ॥ ४२ ॥
कस्मात्तातः क्रुध्यति मां विलोक्य
कोशागारं पश्य रिक्तं कृतं तत् ।
नानादेशादागतेभ्यो द्विजेभ्यो
दत्तं द्रव्यं याचकेभ्योऽखिलेभ्यः ॥ ४३ ॥

नारद उवाच--

आः पापो हा धूनयन्स्वं कपालं
हस्ते हस्तं पेषयन्निःश्वसन् सः ।
प्रोवाचेदं धृष्टधीर्याहि घोरं
कान्तारं भिक्षस्व कृष्णाजिनी त्वम् ॥ ४४ ॥

मदन उवाच--

नैतच्चित्रं तात ! रामो वनं यत्
पितुर्वाक्यान्निरगात् पुण्यकीर्तिः ।
तथा वनं तव वाक्यात् प्रयास्ये
परं न्यूनं किं कृतं मे विवाहे ॥ ४५ ॥

नाहूतोऽयं देशपालः कुलिन्दः
तत्पत्नी वा किं करोम्यल्पकाले ।
" समायातस्तत्सुतो,ऽलेखि पत्रं
शीघ्रं, जह्या नो मुहूर्तं," त्वयेत्थम् ॥ ४६ ॥
किं वेदानीं यामि भूपं कुलिन्दं
समाहूयात्रानयिष्ये नमस्ये ।
न्यूनं नान्यद्भाति कन्याविवाहे
सर्वे दत्ता वाजिनो हस्तिनश्च ॥ ४७ ॥

धृष्टबुद्धिरुवाच—

दूरं प्रसर्प न मुखं मम दर्शयाद्य
पत्रं समानय निरीक्षत तत्र किंस्वित् ।
तेनाहृतं पत्रमपश्यदेष
मन्त्री विधातुर्लिपिमन्वमंस्त ॥ ४८ ॥
क्षणं दध्यौ सान्त्वयामास पुत्रं
सत्यं त्वदीयं किल वीक्षितञ्च ।
मया त्वसौ चन्द्रहासो विसृष्ट-
स्तथा पत्रं लिखितं गूढभावम् ॥ ४९ ॥
जातो दैवाद्विषयाया विवाहो
नाहं कर्त्ता न भवान्नापरोऽपि ।
इत्थं समाश्वास्य सुतं दुरात्मा
तं चन्द्रहासं परिपूज्य दम्भात् ॥ ५० ॥

जाते चतुर्थे दिवसे चतुर्थी-
कर्म व्यधात् कैतवाद् धृष्टबुद्धिः ।
ततः परं दूयमानः स राजन् !
कर्ता किमत्राद्य विपक्षपक्षे ॥ ५१ ॥
कृतं मया ह्येकमहो द्वितीय-
मग्रे कथं कार्यममुष्य शत्रोः ।
इत्थं निमग्नः स तु शोकसिन्धौ
कर्तव्यनौकारहितेऽल्पबुद्धिः ॥ ५२ ॥

इति चन्द्रहासोपाख्याने
धृष्टबुद्धिसंतापो नाम
सप्तमोऽध्यायः

अष्टमोऽध्यायः

नारद उवाच—

धृष्टधीश्चिन्तयामास विपरीतमभून्मम ।
दत्ता तु विषया कन्या वध्यायास्मदरातये ॥ १ ॥
अतः परं मया कार्यं किं कं गच्छामि बान्धवम् ।
पुत्रोऽयं मद्वशे नैव वर्त्तते मदनोऽमलः ॥ २ ॥
आभ्यां मदीयं हि कुलं पुत्राभ्यां नाशितं ध्रुवम् ।
चन्द्रहासो विशेषेण नाशयिष्यति मत्कुलम् ॥ ३ ॥
विषया विधवा भूयात्करिष्याम्यनृतं वचः ।
मुनीनामिति संचिन्त्य चाण्डालांस्तानथाह्वयत् ॥ ४ ॥
एकान्ते संस्थितः पापः संदिदेश शनैः शनैः ।
चण्डिकायतनं बाह्ये पुरादुपवने शुभे ॥ ५ ॥
करवालकराः सर्वे तत्र गच्छत मौनिनः ।
गूढं तस्य स्थिताः कोणद्वये निश्चलमानसाः ॥ ६ ॥
जाते पितृप्रसूकाले यः कश्चिदपि यास्यति ।
भवद्भिः स हि हन्तव्यो मा विचारयत ध्रुवम् ॥ ७ ॥
पूर्वं यथा वञ्चितोऽहं तथा मा कुरुताधुना ।
युष्माकं संपदामर्धं प्रदास्ये मदनांशकम् ॥ ८ ॥
तस्य वाक्यं समाकर्ण्य तेऽन्त्यजाश्चण्डिकालयम् ।
जग्मुः प्रच्छन्नवेषाश्च तृतीयप्रहरे सति ॥ ९ ॥

धृष्टबुद्धिश्चन्द्रहासं विनयाद् वाक्यमब्रवीत् ।
चन्द्रहास ! महाप्राज्ञ ! शृणु मे वचनं हितम् ॥ १० ॥
अस्माकं हि कुले देवी चण्डिका पूज्यते किल ।
कृतोद्वाहो भवानद्य तां नमस्कुरु मातरम् ॥ ११ ॥
सायं सन्ध्यां विधायाशु पुष्पाण्यादाय चन्दनम् ।
एकः प्रयाहि तां देवीं पुरबाह्यकृतालयाम् ॥ १२ ॥
पूजितुं च नमस्कर्त्तुमित्यादिश्य कुधीः स्थितः ।
ओमित्युक्त्वा ततो वाक्यं चन्द्रहासो ह्यकैतवात् ॥ १३ ॥
स सन्ध्यावन्दनं कृत्वा गन्तुकामो बभूव ह ।
अम्बिकालयमेवासौ चन्द्रहासो महायशाः ॥ १४ ॥

नारद उवाच—

एतस्मिन्नन्तरे पार्थ ! राजा कौन्तलपः सुधीः ।
गालवं तं समाहूय देहचेष्टामथाब्रवीत् ॥ १५ ॥
स्वामिन् गालव ! भूलोके राज्यं मे कुर्वतो न हि ।
सुखमस्ति तनुच्छायामशिरस्कां विलोकये ॥ १६ ॥
उत्क्रान्तिसमयो मेऽद्य समायातो न संशयः ।
हितोपदेशमाख्याहि यं श्रुत्वा निर्वृतिं लभे ॥ १७ ॥

गालव उवाच—

सारभूतमुपासीत ज्ञानं यत्कार्यसाधनम् ।
इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् ।
अपि कल्पसहस्रायुर्न स ज्ञानमवाप्नुयात् ॥ १८ ॥

त्यक्तसङ्गो निराहारो जितक्रोधो जितेन्द्रियः ।
विषयेभ्यो निवर्त्याशु मनो ध्याने निवेशयेत् ॥ १९ ॥

नारद उवाच—

योगसारं समाकर्ण्य गालवान्मुनिपुङ्गवात् ।
राज्यं त्यक्तुमनाः सोऽथ जीर्णां त्वचमिवोरगः ।
तत्रोपविष्टं मदनं समाहूयेदमब्रवीत् ॥ २० ॥

राजा कौन्तलपस्तस्य कर्णे जामातरं स्वकम् ।
समानयाशु मदन ! करिष्ये ह्यात्मनो हितम् ॥ २१ ॥

बाढमित्यालपित्वा स प्रायाज्जामातरं प्रति ।
सूर्ये जपाप्रसूनाभे ह्यस्तं गिरिमुपाश्रिते ॥ २२ ॥

ददर्श चन्द्रहासं तं कृतसन्ध्याविधिं शुचिम् ।
पुष्पकर्पूरकस्तूरीचन्दनाम्बरधारिणम् ॥ २३ ॥

हरिद्राकुङ्कुमोन्मर्दगौराङ्गं मुकुटावृतम् ।
एकाकिनं समायान्तं पथि दृष्ट्वाऽब्रवीत्स्मरः ॥ २४ ॥

अयि त्वं चन्द्रहासाशु कुतो व्रजसि तद् वद ।
चन्द्रहासोऽब्रवीद्वाक्यं पित्राहं प्रेरितस्तव ॥ २५ ॥

चण्डिकाश्च नमस्कर्तुं महिषघ्नीं बहिः स्थिताम् ।
वारयामास मदनस्त्वं याहि नृपमन्दिरम् ॥ २६ ॥

देहि चन्दनपुष्पाणि त्वं नृपं त्वरितं व्रज ।
इत्युक्त्वा पुष्पमालाढ्यं पात्रमाच्छिद्य तत्करात् ॥ २७ ॥

ययौ स मदनश्चैकश्चण्डिकाभवनं तदा ।
अवतीर्य हयात्तस्मात् सेवकान् विनिवार्य च ॥ २८ ॥
व्रतभङ्गभयात् पार्थ ! छत्रचामरवर्जितः ।
चन्द्रहासस्तमारुह्य वाजिनं च प्रयत्नतः ॥ २९ ॥
तैरेव सेवकैः सार्धं छत्रचामरवीजितः ।
प्राप कौन्तलपं वेगान्नमस्कृत्य पुरः स्थितः ॥ ३० ॥
चन्द्रहासं समालोक्य राजा कौन्तलपोऽब्रवीत् ।
स्वामिन् गालव ! यास्यामि वनं त्यक्त्वा परिच्छदम् ॥३१॥
सर्वसङ्गपरित्यागं पात्रे कुर्वेऽद्य वैष्णवे ।
ओमित्युक्तः स मुनिना ददौ चम्पकमालिनीम् ॥ ३२ ॥
चन्द्रहासाय निखिलं राज्यं प्रादादवाङ्मुखः ।
परित्यज्य च वस्त्राणि वनमागाद् विरक्तिभाक् ॥ ३३ ॥
पश्यंस्तुच्छमिमं सर्वं स देवासुरमानुषम् ।
पाशैर्गुणमयैर्बद्धं बध्यमानं च नित्यशः ॥ ३४ ॥
पुत्रस्वभ्रातृपौत्रादिस्वपारक्यादिभावितैः ।
आकृष्यमाणं करणैर्दुःखार्तं भिन्नदर्शनम् ॥ ३५ ॥
अज्ञानपङ्कगर्तस्थमनुबुद्ध्वा महीपतिः ।
आत्मानं च समुत्तीर्णं गाथामेतामगायत ॥ ३६ ॥
अहो ! कष्टं यदस्माभिः पूर्वं राज्यमनुष्ठितम् ।
अपि पश्चान्मया ज्ञातं योगान्नास्ति परं सुखम् ॥ ३७ ॥

नारद उवाच—

इत्थं संसारपाशेभ्यो मुक्तः कौन्तलपो नृपः ।
सिंहासने चन्द्रहासं गालवः सोऽभ्यषेचयत् ॥ ३८ ॥
गान्धर्वेण विवाहेन तदा चम्पकमालिनीम् ।
परिणिन्ये चन्द्रहासः सूर्येऽस्तं याति पाटले ॥ ३९ ॥

नारद उवाच—

पुष्पाणि च समादाय गच्छन्स मदनः पथि ।
ददर्श युध्यत्पुरतो बिडालद्वयमातुरम् ॥ ४० ॥
हस्ताच्चन्दनपुष्पाणां पात्रं भूमावथापतत् ।
रुधिरं प्रास्रवन्नेत्रान्मदनस्य मुखात्तथा ॥ ४१ ॥
उलूकः स च वै मूर्ध्नि स्थितवान् भीमनिःस्वनः ।
तथाप्यगणयन् पार्थ ! मदनो वाक्यमब्रवीत् ॥ ४२ ॥
अपि स्वस्ति भवेत्तस्मै चन्द्रहासाय धीमते ।
इत्येवं चिन्तयन्प्राप मदनश्चण्डिकालयम् ॥ ४३ ॥

अवाङ्मुखः सन्स विवेश धीमान्
कपाटयुग्मं प्रहरन् करेण ।
शब्दं समाकर्ण्य च ते पशुघ्नाः
शस्त्राणि यत्नाज्जगृहुः प्रमत्ताः ॥ ४४ ॥
कर्णे लगित्वा शनकैरवोचन्
द्विजघ्न ! धेनुघ्न ! शिशुघ्न ! कश्चित् ।

प्राप्तो मुमूर्षुस्तदिहात्र जन्तुः
स्वनामवैयर्थ्यमहो न कार्यम् ॥ ४५ ॥

न लङ्घनीयः कुलधर्म एष नीतिस्ततो हिंस्युरमुं च शूलैः ।
अथ प्रविष्टं मदनं सुवेषं दक्षं पितुर्वाक्यकरं पशुघ्नाः ।
शूलैश्च खड्गैर्निशितैश्च पट्टिशैर्जघ्नुस्तदा प्राह सुतः सुमन्त्रिणः ४६

हे चण्डिके ! वैष्णवि नो लुलायो
दैत्यो निशुम्भोऽपि न शुम्भ एव ।
न रक्तबीजोऽहमिहागतस्त्वां
कस्माच्च शूलैरभिहंसि मातः ! ॥ ४७ ॥

न प्रार्थयाम्यद्य च जीवितार्थं
त्वं साक्षिणी मे वचनस्य भूयाः ।
यच्चन्द्रहासार्थमभाणि बाहू
शिरः प्रदास्ये ह्यनृणोऽहमासम् ॥ ४८ ॥

इत्यूचिवान् मन्त्रिपुत्रस्तदानीं
जहौ प्राणानुच्चरन् माधवेति ।
चण्डालास्ते प्रस्फुरद्वाक्यभीता
जग्मुस्ते वै को हतोऽस्माभिरेव ॥ ४९ ॥

इति चन्द्रहासोपाख्याने
कुन्तलपुरराज्यप्राप्ति-
र्नामाष्टमोऽध्यायः

नवमोऽध्यायः

नारद उवाच—

राज्यं लब्ध्वा चन्द्रहासः पत्नीं चम्पकमालिनीम् ।
शुभे गजे तया सार्धमारुरोह निशागमे ॥ १ ॥
नमस्कर्त्तुं धृष्टबुद्धिं मृदङ्गध्वनिशोभितः ।
आजगाम त्वरायुक्तो दिदृक्षुः श्वशुरं नृप ! ॥ २ ॥
शंसन्ति स्म वचस्तस्मै मन्त्रिणे च वचोहराः ।
मन्त्रिन् ! समागतं पश्य चन्द्रहासं नृपं नवम् ॥ ३ ॥
जामातरं तव विभो ! राज्ञः कौन्तलपस्य च ।
तेषां वचनमाकर्ण्य क्रोधान्मन्त्री वचोऽब्रवीत् ॥ ४ ॥
युष्माकं रसनां छेत्स्ये मूलमारभ्य पापिनाम् ।
कोऽन्यः कौन्तलपाद्राजा भविष्यति धरातले ॥ ५ ॥
वचोहरा ब्रुवन्ति स्म स्वामिन् ! दृष्ट्यावलोकय ।
तावत्प्राप्तश्चन्द्रहासो जायया सहितः पुरः ॥ ६ ॥
ददर्श धृष्टबुद्धिस्तं नेत्रे स्वे परिमार्जयन् ।
उताहो स्वित्सुतः प्राप्तो मदनोऽयं भविष्यति ॥ ७ ॥
पुरतो विद्यते कन्या यथा चम्पकमालिनी ।
उवाचोच्चैस्तदा मन्त्री रे रे मदन ! किं कृतम् ॥ ८ ॥
इति चिन्तयतस्तस्य चन्द्रहासः पुरः स्थितः ।
अवतीर्य गजात्तस्मात्पादौ जग्राह मन्त्रिणः ॥ ९ ॥

चुबुके धृष्टबुद्धिस्तं दधार, न भवान् गतः ।
चण्डिकाभवनं रम्यं, गोत्रस्थितिविनाशकृत् ! ॥ १० ॥

चन्द्रहास उवाच—

यावद् गच्छाम्यहं स्वामिन् ! पुष्पचन्दनपात्रभृत् ।
तावत् कौन्तलपादेशकारको मदनश्च माम् ॥ ११ ॥
वारयामास पश्चाच्च स्वयं देवीं जगाम सः ।
तत्तस्य वचनं श्रुत्वा कठोरं मर्मभेदि च ॥ १२ ॥
ऊर्ध्वबाहुर्मुक्तकेशो मन्त्री स विलपन् ययौ ।
परार्थं योऽवटं कर्ता तस्मिन् स पतति ध्रुवम् ॥ १३ ॥
तस्मात् सर्वप्रयत्नेन प्राणिनां हितमाचरेत् ।
उत्तिष्ठन्निपतन् भूमौ ध्वान्ते घोरे स्थितः पथि ॥ १४ ॥
धृष्टबुद्धिर्जगामाशु चण्डिकाभवनं प्रति ।
ददर्श पुत्रं मदनं खड्गशूलविदारितम् ॥ १५ ॥
दृष्ट्वा तं मदनं पुत्रं तथा छिन्नमनोरथः ।
स्वकीयस्यैव वंशस्य छिन्नं मूलं स धृष्टधीः ॥ १६ ॥
परित्यज्य चिताकाष्ठं पश्यन् स सुतमातुरः ।
आलिलिङ्ग तथाभूतं समुत्थाप्य च पाणिना ॥ १७ ॥

धृष्टबुद्धिरुवाच—

उत्तिष्ठोत्तिष्ठ रे पुत्र ! चन्द्रहासः समागतः ।
तस्मै त्वं विषयां कन्यां प्रदेहि विपुलं धनम् ॥ १८ ॥

मया त्वं कठिनैर्वाक्यैः पीडितोऽसि प्रकोपितः ।
इत्थं विलप्य बहुधा धृष्टधीः स्वशिरस्तदा ।
आस्फालयामास भृशं स्तम्भे धातुविभूषिते ॥ १९ ॥
स भिन्नमस्तको भूमौ स्फुटिताण्डमिवापतत् ।
तस्मिन्निपतिते पार्थ ! धृष्टबुद्धौ च तत्सुते ॥ २० ॥
प्रभातसमये जाते तापसः पुष्पतोयभृत् ।
चण्डिकाभवनं प्रायात् स्नापितुं पूजितुं च तां ॥ २१ ॥
प्राविशद् भवनं देव्याः स लिङ्गी पुरतो मृतौ ।
धृष्टधीमदनौ शान्तौ दीपाविव ददर्श ह ॥ २२ ॥
आहो स्वित् किं बभूवात्र नवराज्यफलं स्फुटम् ।
मन्त्रिपुत्रावपि हतौ नृपकौन्तलपप्रियौ ।
आगतश्चन्द्रहासाय तापसः शंसितुं तदा ॥ २३ ॥

तापस उवाच—

केनापि निहतौ राजन् ! धृष्टधीमदनौ बहिः ।
चण्डिकाभवने रात्रौ तच्छीघ्रमवधार्यताम् ॥ २४ ॥
तस्य वाक्यं समाकर्ण्य पद्भ्यामेवागतो नृपः ।
चन्द्रहासः सुदुःखार्त्तो देव्या भवनमातुरः ।
ददर्श पुरतो देव्याः पितापुत्रौ च तादृशौ ॥ २५ ॥
चन्द्रहासोऽब्रवीद्वाक्यं हे मातश्चण्डिके ! मयि ।
क्रुद्धाऽसि चेन्मां गृहाण त्वया ह्येतौ वृथा हतौ ॥ २६ ॥

कुण्डं खनित्वा रुचिरं चतुरस्रं सुलक्षणम् ।
तस्मिन् पावकमारोप्य बलिदीपपुरःसरम् ॥ २७ ॥
जुहावाज्यतिलान् रम्यान् पायसं सितया सह ।
स्वदेहमांसमुद्धृत्य सूक्तं जप्त्वा जुहाव सः ॥ २८ ॥
सर्वं मांसं चन्द्रहासो हुत्वा पादशिरोधरान् ।
अस्थीनि धारयन् शीर्षे प्राह स्म जगदम्बिकाम् ॥ २९ ॥
चराचरगुरोर्विष्णोः शिवच्छक्तिस्त्वमुदाहृता ।
सर्वेषां कर्मणां मातः ! साक्षिणी त्वं पृथक् स्थिता ॥ ३० ॥
अधुना छेद्मि खड्गेन शिरस्तेन जगत्पतिः ।
प्रीयतां स हृषीकेशस्त्वद्रूपः कालिकेऽम्बिके ! ॥ ३१ ॥
इत्येवमुक्त्वा तं खड्गं यावत् कण्ठे दधार सः ।
तावत् प्रादुर्बभूवैषा चण्डिका प्राह तं नृपम् ॥ ३२ ॥
मैवमात्मवधं कार्षीरेष पापः कुकर्मणा ।
पञ्चत्वमगमन्मन्त्री तत्सुतोऽप्यदहादृणम् ॥ ३३ ॥
त्वद्दोषं यत्पुरा प्रोक्तं विवाहसमये स्वसुः ।
प्रसन्नाहं हरेर्भक्त ! चन्द्रहास ! तवाधुना ।
वरौ प्रार्थय भद्रं ते स्वेच्छया मानसौ ध्रुवम् ॥ ३४ ॥

चन्द्रहास उवाच—

हरौ भक्तिः सदा भूयान्मम जन्मनि जन्मनि ।
वरोऽयं प्रथमो मातर्द्वितीयेन मृतौ त्विमौ ।
पितापुत्रौ प्रजीवेतां जगत्पावनि ! ते नमः ॥ ३५ ॥

श्रीदेव्युवाच—

अचला ते हरौ भक्तिर्भविष्यति च सात्त्विकी ।
पुत्रोऽपि भविता शूरस्तोषयिष्यति यो हरिम् ॥ ३६ ॥
चन्द्रहास ! महाप्राज्ञ ! आयाहि पुरतो मम ।
स्थिरो भव मुहूर्तार्धं पिधाय नयने स्वके ॥ ३७ ॥

नारद उवाच—

ततस्तावेव सोऽपश्यद् धृष्टधीमदनौ नृप ! ।
तादृग्रूपवयोवेषौ यथा सुप्तोत्थितौ हि तौ ॥ ३८ ॥
आत्मानं पूर्ववच्चापि निर्व्रणं चन्दनार्चितम् ।
न तां ददर्श जननीं जगदम्बां हरेस्तनुम् ॥ ३९ ॥
खात्पुष्पवृष्टिं पतितां सुरमुक्तां विलोक्य च ।
नमश्चक्रे धृष्टबुद्धिं चन्द्रहासः स्मरं तथा ॥ ४० ॥
समालिङ्ग्य सुसंपूज्य श्वशुरं वाक्यमब्रवीत् ।
हरेर्माया त्वियं सर्वा कश्च जीवति को मृतः ॥ ४१ ॥

नारद उवाच—

एवं स वैष्णवः पार्थ ! व्यसनेन न पीडितः ।
प्रविवेश समं ताभ्यां चन्द्रहासः पुरं निजम् ॥ ४२ ॥

अर्जुन उवाच

दैवात् प्राप महद्राज्यं चन्द्रहासो महामुने ! ।
कुलिन्देन तु पश्चाच्च दुःखितेन तु किं कृतम् ॥ ४३ ॥

नारद उवाच—

शृणु पार्थ ! महाबाहो ! कुलिन्दस्य च चेष्टितम् ।
गतेऽथ चन्द्रहासे स पीडितो धृष्टबुद्धिना ॥ ४४ ॥

विचार्य मनसा देवं हरिं बन्धविमोक्षदम् ।
धनं तद् ब्राह्मणेभ्यस्तु दत्वा निर्वेदमागमत् ॥ ४५ ॥

पुत्रं मे चन्द्रहासाख्यं त्वद्भक्तं त्वत्परायणम् ।
त्वया दत्तं हृषीकेश ! रक्षास्मात्पापचेष्टितात् ॥ ४६ ॥

इत्युक्त्वा स्वगृहे तस्मिन् सपत्नीकः सबान्धवः ।
प्राविविक्षद् हुताशं स निर्विण्णो ध्यानतत्परः ॥ ४७ ॥

एतस्मिन्नन्तरे लोका धृष्टबुद्धौ न्यवेदयन् ।
स्वामिन् ! कुलिन्दो नृपतिः सर्वदा हितकृत्तव ॥ ४८ ॥

दुःखात् सपरिवारोऽसौ विशति स्म हुताशनम् ।
इति तेषां वचः श्रुत्वा प्रेरितो हरिणा ययौ ॥ ४९ ॥

विचार्य मनसा सम्यक् पुत्रोऽस्य निहतो मया ।
किमर्थं घातयाम्येनं वृद्धं धनविवर्जितम् ॥ ५० ॥

पुत्रहीनो मृतो ह्येष दैवेन हि निपातितः ।
एवं विमृश्य मनसा शीघ्रं गत्वा न्यवारयत् ॥ ५१ ॥

मा कुलिन्द ! विषादं त्वं कुरु द्रव्यापहारजम् ।
पुनर्दास्यामि ते वित्तं देशं च विविधं वसु ॥ ५२ ॥

इति नानाविधैर्वाक्यैराश्वस्तः स कुलिन्दकः ।
पुत्राशां परमां कृत्वा उत्थितः प्रणनाम तम् ॥ ५३ ॥
धृष्टबुद्धिस्त्वाजगाम तं निवार्य स्वमन्दिरम् ।
कुलिन्देन श्रुतं सर्वं चन्द्रहासेन यत्कृतम् ॥ ५४ ॥
तच्छ्रुत्वा हर्षसंपन्नो हरिं नत्वा द्विजान् धनैः ।
पूजयामास धर्मात्मा याचकानथ सर्वशः ॥ ५५ ॥
चन्द्रहासोऽपि तद्राज्यं लब्ध्वा तानर्चयद् द्विजान् ।
स्वयं तु बन्धुभिः सार्धं मदनेन द्विजातिभिः ॥ ५६ ॥
आनयामास पितरं मातरं पुत्रवत्सलाम् ।
ततः कौन्तलके राज्यं चकाराब्दशतत्रयम् ॥ ५७ ॥
विषयाऽसूत तनयं मकरध्वजमूर्जितम् ।
असूत शूरं पद्माक्षं सुतं चम्पकमालिनी ॥ ५८ ॥
इत्युक्त्वा नारदः प्रायादर्जुनो विस्मयं ययौ ।
सतां सङ्गाद् विना लोके लभ्यते न सुखं नरैः ॥ ५९ ॥

इति धृष्टबुद्धिमदनपुनरुज्जीवनं
नाम
नवमोऽध्यायः
समाप्तं च चन्द्रहासोपाख्यानम्

कुशलवोपाख्यानम्

प्रथमोऽध्यायः

जैमिनिरुवाच—

अयोध्यायां दाशरथिः शयानः किल सीतया ।
एकदा रात्रिसमये हृष्टः सीतां वचोऽब्रवीत् ॥ १ ॥

राम उवाच—

दोहदः कीदृशो भद्रे ! कस्मिन् वस्तुनि तद्वद ।
सीता तद्वचनं श्रुत्वा भर्तारमिदमब्रवीत् ॥ २ ॥

सीतोवाच—

तव प्रसादान्मे कामः परिपूर्णः सदाऽनघ ! ।
परं भागीरथीतीरे गन्तुमिच्छामि राघव ! ॥ ३ ॥
ऋषिपत्न्यश्च यत्रासन्नृषयोऽजिनवाससः ।
जहास रामः किमिदं न तृप्ता वनवासतः ॥ ४ ॥
सीते ! त्वं दण्डकारण्ये वर्षाणि नव पञ्च च ।
अद्य वा दोहदस्तेऽयं प्रथमो निष्फलः कथम् ॥ ५ ॥
प्रातर्भागीरथीतीरे गमनं तेऽस्तु जानकि ! ।
इति तस्यै प्रतिश्रुत्य सुष्वाप ससुखं प्रभुः ॥ ६ ॥
निशीथे तु व्यतिक्रान्ते चाराः पुरचरा निशि ।
रामं रहःसमागम्य वाक्यमूचुः पृथक् पृथक् ॥ ७ ॥

तव कीर्तिप्रतापश्च सर्वतो वर्ण्यते जनैः ।
रामः पृच्छत्यतिदृढं लोकानां कीदृशी स्थितिः ॥ ८ ॥

मम वा मम भार्याया भ्रातृणां दुष्कृतं किल ।
सुकृतं वा त्वया चार ! भ्रमता निशि यच्छ्रुतम् ॥ ९ ॥

तत्सत्यं वद चार ! त्वं मा भीतिं कुरु दण्डतः ।
चारोऽपि रघुनाथं तं प्रत्युवाच हसन्निव ॥ १० ॥

चार उवाच—

राम ! त्वद्दर्शनादेव दुष्कृतं भस्मसाद्भवेत् ।
तवापि दुष्कृतं मन्ये विपरीतं रघूद्वह ! ॥ ११ ॥

वयं स्थानानि पापानि भ्रमामो रघुनन्दन ! ।
त्वां दृष्ट्वा सर्वपापेभ्यो मुच्येम भरताग्रज ! ॥ १२ ॥

तथाऽपि लोको दुर्वारः किंचिद् दुष्टं वदत्यसौ ।
निशार्धे भ्रमता राजन् ! दृष्टं चित्रतरं मया ॥ १३ ॥

कस्यचिद्रजकस्यास्यां पुर्यां भार्याऽत्यगाद् गृहम् ।
पितुर्वेश्म समासाद्य तस्थौ दिनचतुष्टयं ॥ १४ ॥

रजक्या जनकश्चिन्तामगमत् किं मया कृतम् ।
स्मृत्यागमविरुद्धं हि कन्या यत् पितृवेश्मनि ॥ १५ ॥

तस्माद् दुहितरं चैतां नयिष्ये भर्तृसन्निधिं ।
यथाम्बरस्थं कलुषं शोधयेऽहं स्वकैः करैः ॥ १६ ॥

तथा स्थितायां कन्यायां गृहे यत्तन्न शोध्यते ।
इत्युक्त्वा भ्रातृभिः सर्वै रजकः परिवेष्टितः ॥ १७ ॥
जामातरं समासाद्य कन्यां तस्मै न्यवेदयत् ।
ततः क्रुद्धोऽब्रवीद्वाक्यं सृक्किणी परिलेलिहन् ॥ १८ ॥
जामाता हस्तमुद्यम्य रामोऽहमिति वो मतिः ।
राक्षसानां गृहे सीतां वसन्तीमाजहार यः ॥ १९ ॥
एतावदेव रघुनन्दन ! सोऽब्रवीत्तद्वाक्यं
पुनः पुनरिदं रजकोऽत्र कोपात् ।
राज्ञा समर्थपदवीमधितिष्ठुता तद्
रामेण चेत्कृतमहं न तथा करोमि ॥ २० ॥
इत्थं वचांसि स्म वदत्यवश्यं
नान्य जनो वक्तुमलं बभूव ।
ततो मया वाक्यमिदं विविक्तं
सत्यं ब्रवीत्येष कुतो हि रामः ॥ २१ ॥
गङ्गातटद्वीपनिखातयूपः
स्वधर्मनिष्ठः पितृवाक्यकर्त्ता ।
जेता दशास्यस्य जगच्छरण्यः
स राघवः केन समोऽस्ति लोके ॥ २२ ॥
आचारेषु निषण्णोऽयं न गुणेषु च सस्पृहः ।
मूढो न वेत्ति तं रामं गुणिनं रजको ह्ययम् ॥ २३ ॥

मनसा चिन्तयित्वैवं राम ! त्वामहमागमम् ।
दूतं तं तु विसृज्याशु चिन्तयामास राघवः ॥ २४ ॥
शुद्धाऽपि जानकी वह्नौ लोकेऽस्मिन् परिगर्ह्यते ।
तस्मात्त्यजेयं नो वेति चिरं दध्यौ स जानकीम् ॥ २५ ॥
कथं तां मृगशावाक्षीं सीतां पद्मनिभाननां ।
त्यजामि श्रोत्रियो मुख्यामाचारस्येव पद्धतिम् ॥ २६ ॥
अथ चेमां परित्यक्ष्ये कलौ विप्रा यथा श्रुतिम् ।
इति चिन्तयतस्तस्य प्रातःकालोऽभवत्तदा ॥ २७ ॥

जैमिनिरुवाच—

ततोऽसौ जानकीत्यागे मनःकृत्वा रघूद्वहः ।
आह्वयामास भरतं शत्रुघ्नं लक्ष्मणं तथा ॥ २८ ॥
एतस्मिन्नन्तरे प्राप्तो भरतो लक्ष्मणस्तथा ।
शत्रुघ्नश्च महाबाहुः सेवितुं रघुनन्दनम् ॥ २९ ॥
ददृशुस्ते ततो रामं विषण्णं दीनचेतसम् ।
प्रोचुस्तेऽन्योन्यमासीनं रामं शीघ्रं न चागताः ॥ ३० ॥
तस्मात्किं कुपितो भ्राता दृष्ट्वाऽस्मान्दानवर्जितान् ।
किमस्माभिर्द्विजश्रेष्ठाः प्रातर्नो पूजिता इति ॥ ३१ ॥
न प्रातर्जागृताः किं वा किं वा शीघ्रं नमस्कृताः ।
इत्येतत्संवदन्तस्ते भ्रातरो वह्नितेजसः ॥ ३२ ॥

आयाता रघुनाथं तं नमस्कृत्येदमब्रुवन् ।
त्वन्मनस्कान् सदा राम ! त्वत्समर्पितकर्मणः ॥ ३३ ॥

त्वद्दर्शनसमुत्कण्ठान् किमस्मान्नाभिनन्दसे ।
रामस्तेषां वचःश्रुत्वा स शनैर्वाक्यमब्रवीत् ॥ ३४ ॥

इति कुशलवोपाख्याने
रामवाक्यं नाम
प्रथमोऽध्यायः

द्वितीयोऽध्यायः

जैमिनिरुवाच—

रामस्तु कथयामास चारेणोक्तं यथा निशि ।
सीता च गह्यते लोकैर्यथा पाखण्डिभिः श्रुतिः ॥ १ ॥
लोकापवादभीतेन त्यज्यते जानकी मया ।
संसारभयभीतेन योगिना ममता यथा ॥ २ ॥
तद्रामवाक्यमाकर्ण्य वज्रपातोपमं तदा ।
